श्रीसिद्धहैमशब्दानुशासनानुसारि

# श्रीमध्यमसिद्धप्रभाव्याकरणं

प्रणम्य परमात्मानं, सर्वाभिलाप्यदेशिनम् ।
विभक्तिदेशकं सिद्धप्रभा संक्षिप्यते मया ॥ १ ॥

अर्हं मंगलाय शास्त्रादौ ध्येयम् । सिद्धिः स्याद्वादात् , कथंचिन्नित्यानित्यत्वादिरूपात् स्याद्वादात्, सिद्धिः शब्दस्य निष्पत्तिर्ज्ञप्तिश्च । लोकात्, अनुक्तस्य लोकात्सिद्धिर्ज्ञेया । औदन्ताः स्वराः, अकाराद्या औकारावसानाः स्वराः, अ आ इ ई उ ऋ ॠ ऌ ॡ ए ऐ ओ औ । एकद्वित्रिमात्रा ह्रस्वदीर्घप्लुताः, अ इ उ ऋ ऌ इत्येकमात्रा ह्रस्वाश्च, आ ई ऊ ॠ ॡ ए ऐ ओ औ इति द्विमात्रा दीर्घाश्च, अ ३ आ ३ इ ३ इत्याद्यास्त्रिमात्राः प्लुताश्च । ॡदन्ताः समानाः, अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ । अनवर्णा नामी, अवर्णवर्जाः स्वरा नामिनः । ए ऐ ओ औ सन्ध्यक्षरम् । कादिर्व्यञ्जनम्, कादयो हान्ता व्यञ्जनानि । कखगघङ चछजझञ टठडढण तथदधन पफबभम यरलव शषस ह । अपञ्चमान्तस्थो धुट्, ङञणनमयरलववर्जः कादिर्वर्णो धुट्संज्ञः । पञ्चको वर्गः, कादिमान्तेषु पञ्चपञ्चवर्णपरिमाणो वर्गः, कचटतपा वर्गाः । आद्यद्वितीय-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

शषसा अघाषोः, कखचछटठतथपफशषस । अन्यो घोषवान्,शेषा गादयो घोषवन्तः । यरलवा अन्तःस्थाः । अंअः-≍क)(पशषसाः शिट्, अनुस्वारविसर्गजिह्वामूलीयोपध्मानीयशषसाः शिट्संज्ञाः । तुल्यस्थानास्यप्रयत्नः स्वः, समानस्थानप्रयत्नो वर्णः स्वसंज्ञः, अवर्णकवर्गहविसर्गजिह्वामूलीयानां कण्ठः, इवर्णचवर्गयशानां तालु, ऋवर्णटवर्गरषाणां मूर्धा, ऌवर्णतवर्गलसानां दन्ताः, उवर्णपवर्गोपध्मानीयानामोष्ठौ, एऐ कण्ठतालु, ओऔ कण्ठोष्ठं, वो दन्तोष्ठ्यः, ङञणनमा अनुनासिकाश्च, शषसहा ऊष्माणः, इति स्थानानि । स्पृष्टः प्रयत्नो वर्ग्याणाम् , ईषत्स्पृष्टःअन्तःस्थानाम् , ईषद्विवृत ऊष्मणां, विवृतः स्वराणाम् , इत्यास्यप्रयत्नः । अप्रयोगीत्, कथितोऽपि यो न दृश्यते कार्ये स इत्संज्ञः, तस्य च लोपः । अनन्तः पञ्चम्याः प्रत्ययः, पञ्चमीतः कृतः प्रत्ययसंज्ञो यदि न तत्रान्तशब्दप्रयोगः ।

इति संज्ञाप्रकरणम्



इवर्णादेरस्वे स्वरे यवरलम् , इउऋऌवर्णानां यवरलाः स्युर्विजातीये स्वरे परे, दधि अत्र दध्य् अत्र । अदीर्घाद्विरामैकव्यञ्जने, अदीर्घस्वरात् ह्रस्वरवर्जितस्य वर्णस्य द्वे रूपे स्याताम् विरामेऽसंयुक्तव्यञ्जने च, दध्ध्य् अत्र । तृतीयस्तृतीयचतुर्थे, धुटस्तृतीयः स्यात् तृतीये चतुर्थे च परे, धस्य स्वसंज्ञको द इति दद्ध्यत्र, एवं मध्विदं क्रादिः लित् , वर्णग्रहणाद्दीर्घाणामपि नद्येपेत्यादि । ह्रादर्ह्रस्वरस्यानु द्वे नवा, स्वरात् ह्रादर्ह्रस्वरस्य वा द्वे रूपे, सर्वकार्यात् पश्चात् , मह्य्यत्र । एदैतोऽयाय् स्वरे, मुने ए मुनये, रै औ रायौ । ओदौतोऽवाव् स्वरे, भो अनं भवनं, ग्लौ औ ग्लावौ । स्वरे वा, अवर्णभोभगोऽघोभ्यः परयोर्य्वोः पदान्ते वा लुक् स्वरे, न च सन्धिः, ते इह तयिह त इह, तस्मै इह तस्मायिह तस्मा इह, तौ इह ताविह ता इह । समानानां तेन दीर्घः, समानानां स्वेन समानेन सह दीर्घः, दण्डाग्रं दधीदं भानूदयः पितृकारः । अवर्णस्येवर्णा-



P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

दिनैदोदरल्, अवर्णस्य इउऋलवर्णैः सह क्रमेण ए ओ अर् अल् स्युः, देव ईशः देवेशः शुद्धोदकं तवर्द्धिः सल्कारः। ऐदौत्सन्ध्यक्षरैः, अवर्णस्यैदेद्भ्यामैः ओदौद्भ्यामौः, तवैषः तवौदनः। प्रैषप्रैष्यप्रौ-ढप्रौढिप्रौहस्वैरस्वैर्यक्षौहिण्यामैदौत्ता। ऋणे प्रदशार्णवस-नकम्बलवत्सरवत्सतरस्यार्, ऋणस्य ऋताऽमीषामवर्णस्यार्, प्र ऋणं प्रार्णं। ऋते तृतीयासमासे आर्, दुःखार्त्तः। ऋत्यारुप-सर्गस्य, उपसर्गावर्णस्यर्कारादौ धातावार्, पराध्र्नोति। नाम्नि, ऋकारादौ नामधातौ वार्, प्रार्षभीयति प्रर्षभीयति। ऌत्याल्वा, उपाल्कारीयति उपल्कारीयति। उपसर्गस्यानिणेधेदोति, इणे-ध्वर्जित एदोदादौ धातावुपसर्गावर्णस्य लुक्, प्रेजते उपोखति। वा नामधातौ उपेडकीयति। अनियोगे लुगेवे, इहेव। वौष्ठौतौ समासेऽवर्णस्य लुक्, बिम्बोष्ठी स्थूलोतुः। ओमाङि लुगवर्णस्य, उपेहि। एदोतः पदान्तेऽस्य लुक्, पदान्ते स्थितादेदोतोऽका-रस्य लुक्, तेऽत्र पटोऽत्र ॥ गोर्नाम्न्यवोऽक्षे, गोरोतोऽवो नाम्न्यक्षे, गवाक्षः। स्वरे वाऽनक्षे गोरोतोऽवः पदान्ते, गवा-ग्रम् गोऽग्रम्। वात्यसन्धिः गोरोतः, गो अग्रम्। इन्द्रे गोरोतो-ऽवः, गवेन्द्रः ॥ इति स्वरसन्धिः ॥



प्लुतोऽनितौ, इतिवर्जे स्वरे प्लुतोऽसन्धिः, सुश्लोक३ आगच्छ। ह्रस्वोऽपदे वा, इवर्णादेर्विजातीयस्वरे परे वा ह्रस्वो, न चेदेकपदे, कुमारि अत्र। समासे नद्युदकम्। ऋलृति ह्रस्वो वा समानानाम्, ब्रह्म ऋषिः, ह्रस्वविधेर्नार्। दूरादामन्त्र्यस्य गुरुर्वैकोऽनन्त्योऽपि लनृत्, दे३वदत्त देवद३त्त वा, ऋलृ-वर्णयोः सावर्ण्याल्लृनृदिति। हेहैष्वेषामेव दूरादामन्त्र्ये स्वरः प्लुतः, हे३ मैत्र। इ३ वा प्लुतः स्वरेऽसन्धिः, लुनीहीति लुनीहि३ इति। ईदूदेद् द्विवचनं, ईदूदेदन्तं द्विवचनान्तं असन्धिः, मुनी अत्र, साधू अत्र, माले आनय। अदो मुमी, अदसो मुमी असन्धिः, अमी अत्र अमुमुईचः। चादिः स्वरोऽनाङ्, केवल-श्चादिस्वरोऽसन्धिः आङं वर्जयित्वा, अ अपेहि, अनाङिति



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

किम् ?-आ आर्येभ्यः आर्येभ्यः, वाक्यस्मरणयोरेवाङित् । ओदन्तश्चादिरसन्धिः, अहो अत्र । सौ नवेतौ, सावोदन्त इतौ वाऽसन्धिः, विष्णो इति विष्णविति । न सन्धिः विरामे, दधि अत्र । इत्यसन्धिः ।

तवर्गस्य श्चवर्गष्टवर्गाभ्यां योगे चटवर्गौ, तच् शेते तच्चरति राज्ञः पेष्टा तड्डीनं इट्टे । सस्य शषौ श्चवर्गष्टवर्गाभ्यां योगे, कश्चरति कश्शूरः धनुष्षु बम्भण्षि । न शात् तवर्गस्य चवर्गः, प्रश्नः । षि तवर्गस्य पदान्ते न टवर्गः, तीर्थकृत्षोडशः । पदान्ताट्टवर्गादनाम्नगरीनवतेः सतवर्गयोः षटवर्गौ न, षट् नयाः, अनामित्यादि किं?, षण्णवतिः । धुटस्तृतीयः पदान्ते । तदन्तं पदम्, स्याद्यन्तं त्याद्यन्तं च पदम् । नाम सिद्यय्व्यञ्जने, सिति प्रत्यये यवर्जव्यञ्जनादिप्रत्यये च नामापि पदम्, वाग्भिः । तृतीयस्य पंचमे पदान्ते तृतीयस्य वा पंचमः पञ्चमे परे, वाङ् मधुरा वाग् मधुरा । प्रत्यये च, तृतीयस्य पञ्चमादिप्रत्यये पञ्चमः, चिन्मयं । लि लौ, तवर्गस्य लः पदान्ते, तल्लुनाति, सानुनासिको लो नकारस्य, भवांल्लिखति । उदः स्थास्तम्भः सलुक्, उत्थाता । ततो हश्चतुर्थः, पदान्ते तृतीयात् हस्य वा चतुर्थो भवति, तद्धविः, पूर्वतवर्गस्य चतुर्थो धः, तद् हविः । प्रथमादधुटि शश्छः पदान्ते वा, वाक्छूरः वाक्शूरः । तौ मुमो व्यञ्जने स्वौ, पदान्ते मस्यानुस्वारः परसवर्णानुनासिकश्च व्यंजने, त्वं करोषि त्वङ् करोषि, मोऽस्त्वपदान्ते चंक्रम्यते चङ्क्रम्यते । शिड्हेऽनुस्वारो म्नामपदान्ते, पुंसि यशांसि । म्नां धुड्वर्गेऽन्त्योऽपदान्ते, अपदान्ते म्नां धुड्जातीयवर्ग्याक्षरे तत्सवर्णोऽन्त्यः, गन्ता अञ्चितः । मनयवलपरे हे पदान्ते मोऽनुस्वारो मनयवलाश्च, किन् ह्नुते । सम्राट् नात्रानुस्वारः । ङ्णोः कटावन्तौ शिटि नवा पदान्ते, प्राङ्क् शेते सुगण्ट् साधुः । शिट्याद्यस्य द्वितीयो वा, प्राङ्ख् शेते । ङ्नः सः त्सोऽश्चः पदान्ते वा, षड्त्सीदन्ति भवान्त्साधुः । नः शि ञ्च वा पदान्तेऽश्चि,



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भवाञ्च् छूरः। ह्रस्वात् ङ्णनो द्वे पदान्ते स्वरे, कुर्वन्नास्ते। पुमोऽशिट्यघोषेऽख्यागि रः, पुमोऽधुट्परेऽघोषे रोऽन्तः पूर्वस्यानुस्वारानुनासिकौ च,न चेत् स शिट् ख्याग्वा। पुंसः रः कखपफि सः, पुँस्कोकिलः पुंस्कोकिलः, अशिटीत्यादि किम् ? पुंक्षुरः पुंदासः पुंख्यानं। नॄनः पेषु वा रोऽन्तादेशः पूर्वस्यानुस्वारानुनासिकौ च। रः पदान्ते विसर्गस्तयोर्विरामाघोषयोः। रः कखपफयोः ≍क ≍प वा पदान्ते,नॄँःपाहि नॄंः पाहि नॄँ≍पाहि नॄं≍पाहि नॄन् पाहि। द्विःकानःकानि सोऽन्तादेशोऽनुस्वारानुनासिकौ च पूर्वस्य, काँस्कान्। नोऽप्रशानोऽनुस्वारानुनासिकौ च पूर्वस्याधुट्परे चटते सद्वितीये शषसाः पदान्ते, भवाँश्चरति भवांश्चरति भवाँष्टीकते भवांस्तनोति। स्वरेभ्यश्छो द्विः। अघोषे प्रथमोऽशिटः, देवच्छत्रं। अनाङ्माङो दीर्घाद्वा छो द्विः, जम्बूच्छाया जम्बूछाया। प्लुताद्वा, इन्द्रभूते ३ च्छत्रं छत्रम् वा। ॥ इति व्यञ्जनसन्धिः ॥

सो रुः पदान्ते, जिनः। ख्यागि रो विसर्ग एव पदान्ते, जिनः ख्यातः। शिट्यघोषात् विसर्ग एव रः, अद्भिः प्सातम्। व्यत्यये लुग्वा रः,क स्खलति कः स्खलति। शषसे शषसं वा रः पदान्ते, कश्शूरः कः शूरः। चटते सद्वितीये रः शषसाः, कश्चरति। अतोऽति रोरुः पदान्ते, कोऽर्थः। घोषवति रोरुरतः, को देवः। अवर्णभोभगोऽघोभ्यो लुगसन्धिर्घोषवति रोः, धार्मिका जयन्ति भो गच्छसि। रोर्यः, अवर्णभोभगोऽघोभ्यः पदान्ते रोर्यः स्वरे, कयास्ते भोयिह। अरोः सुपि र एव, गीर्षु। रो लुप्यरि,अह्नो रो लुप्यरादौ, अहर्ददाति। अह्नः पदान्ते रूरादौ, अहो रूपम्। वाहर्पत्यादयः, रेफोपध्मानीयविसर्गा एषु। भ्रातुष्पुत्रकस्कादयः, अविहितलक्षणौ षकारसकारौ। रो रे लुग्दीर्घश्चादिदुतः पूर्वस्य, पुना रमते। तदः से स्वरे पादार्था लुक् ,पादः श्लोकचतुर्थभागः, स चेत् पूर्णो भवेत्, सैष दाशरथी रामः। एतदश्च व्यञ्जनेऽनग्नञ्-



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

समासे, नञ्समासं वर्जयित्वाऽगागमाभावे च एतत्तदोः सेर्लुक् व्यञ्जने, स याति एष याति। नमस्पुरसो गतेः कखपफि रः सः, नमस्करोति। तिरसो वा, तिरस्कृत्य तिरःकृत्य। शिरोऽधसः पदे समासैक्ये रः सः, शिरस्पदम्। अतः कृकमिकंसकुम्भकुशाकर्णीपात्रेऽनव्ययस्य रः सः, अयस्कारः अयस्पात्रं। प्रत्ययेऽनव्ययस्यातो रः सः प्रत्ययादौ कखपफि, पयस्पाशम्। रोः काम्ये, अनव्ययस्य काम्ये रोः सः, पयस्काम्यति। नामिनस्तयोः षः, नामिनः परस्य रेफस्य प्रत्ययादौ कखपफि काम्ये च रोः षः, सर्पिष्पाशं सर्पिष्काम्यति। निर्दुर्बहिराविष्प्रादुश्चतुराम् कखपफि रः षः, निष्पीतं चतुष्पात्रं। सुचो वा, चतुष्पचति चतुः पचति। वेसुसोऽपेक्षायां, इसुसन्तस्य रोऽपेक्षायां कखपफि वा षः, सर्पिष्करोति सर्पिः करोति। नैकार्थेऽक्रिये इसुसो रः षः अक्रिये समासे, सर्पि≍कालकं। समासेऽसमस्तस्य, पूर्वेण सहासमस्तस्येसुसन्तस्य रः षः, सर्पिष्कृत्य, समासे तु परमसर्पिःकुण्डम्॥ इति ससन्धिः॥

अधातुविभक्तिवाक्यमर्थवन्नाम। स्त्यादिर्विभक्तिः, स्यादयः त्यादयश्च विभक्तयः स्युः। नाम्नः स्यादयः, स्यौजस् १ अमौशस् २ टाभ्यांभिस् ३ ङेभ्यांभ्यस् ४ ङसिभ्यांभ्यस् ५ ङस्ओस्आम् ६ ङिओस्सुप् ७ एताः सप्त विभक्तय एकद्विबहुवचनरूपाः। देव सि इति, इकार इत्, देवः देवौ। अत आः स्यादौ जस्भ्याम्ये, देवाः। आमन्त्र्ये प्रथमा। अदेतः स्यमोर्लुक् संबोधने, हे देव हे देवौ हे देवाः, आमन्त्रणाभिव्यक्तये हेशब्दस्य प्राक् प्रयोगः। समानादमोऽतो लुक्, देवं देवौ, देव शस्, शकारः शस इति विशेषणाय। शसोऽता सश्च नः पुंसि, शसोऽकारेण समानस्य दीर्घः पुंसि च सकारस्य नः, देवान्। देव टा, टाङसोरिनस्यौ, अदन्तान्नाम्नष्टाङसोः क्रमेणेनस्यौ स्याताम्, देवेन देवाभ्याम्। भिस ऐस् अदन्तस्य, देवैः। ङेङस्योर्यातौ अतः, देवाय देवाभ्याम्। एद्बहुस्भोसि,



P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

बहुवचने सकारभकारादौ परे ओसि चात एः, देवेभ्यः, देवात् देवाभ्याम् देवेभ्यः देवस्य देवयोः। ह्रस्वापश्च, ह्रस्वादापः स्त्रीदूतश्चामो नाम् स्यात् । दीर्घो नाम्यतिसृचतसृषः समानस्य, देवानाम् देवे देवयोः। नाम्यन्तःस्थाकवर्गात् पदान्तः कृतस्य सः शिड्नान्तरेऽपि षः, देवेषु ॥ सर्व विश्व उभ उभय अन्य अन्यतर इतर डतरडतमौ प्रत्ययौ तदन्तौ ततोऽत्र त्व त्वत् समसिमौ सर्वार्थौ पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायाम् | स्वमज्ञातिधनाख्यायाम् | अन्तरं बहिर्योगोपसंव्यानयोरपुरि | त्यद् तद् यद् अदस् इदम् एतद् एक द्वि युष्मद् अस्मद् भवतु किम्, एते सर्वाद्यास्त्रिलिङ्गा असंज्ञायाम्। जसः इः सर्वादेरदन्तात्, सर्वे। रषृवर्णान्नो ण एकपदेऽनन्त्यस्यालचटतवर्गशसान्तरे, सर्वेण। सर्वादेः स्मैस्मातौ ङेङस्योरदन्तात्, सर्वस्मै सर्वस्मात्। अवर्णस्यामः साम् सर्वादेः, सर्वेषाम्। ङेः स्मिन् सर्वादेरतः, सर्वस्मिन्। द्विवचन उभः, उभौ उभाभ्याम् उभयोः। एकत्वबहुत्वयोरुभयः उभये उभयेषां। नवभ्यः पूर्वेभ्य इस्मात्स्मिन् वा, पूर्वेभ्य इति पूर्वाद्यन्तरान्तेभ्यः, पूर्वे पूर्वाः परस्मात् परात् अन्तरस्मिन् अन्तरे। नेमार्धप्रथमचरमतयायाल्पकतिपयस्य वाऽतो जस इः, प्रथमे प्रथमाः, तयायौ प्रत्ययौ ततस्तदन्ता ग्राह्याः द्वितये द्वितयाः द्वये द्वयाः। द्वन्द्वे वा जस इः, परमकतमे परमकतमाः। न सर्वादिर्द्वन्द्वे, परमकतमानां। तृतीयान्तात् पूर्वावरं योगे न सर्वादिः, मासेन पूर्वाय। तीयं ङित्कार्ये वा सर्वादिः, द्वितीयस्मै द्वितीयाय। निर्जरः। जराया जरस्वा स्वरादौ स्यादौ, षष्ठ्याऽन्त्यस्यादेशः, अनेकवर्णः सर्वस्य, निर्जरसौ निर्जरौ, निर्जरसः निजरसा निर्जरसैः निर्जरसाम्। दन्तपादनासिकाहृदयासृग्यूषोदकदोर्यकृच्छकृतो दत्पन्नस्हृदसन्यूषन्नुदन्दोषन्यकन्शकन् वा शसादौ, दतः दन्तान् दता दद्भ्याम्, पदः पादान् यूपान्। पुंस्त्रियोः स्यमौजस् घुट्। अनोऽस्य लुक् ङीस्याद्य-

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

घुट्स्वरे, यूष्णः यूष्णा। **नाम्नो नोऽनह्नः** पदान्ते लुक्, यूषभ्याम् **ईङौ वाऽनोऽस्य लुक्**, यूष्णि यूषणि। **मासनिशासनस्य शसादौ लुग्वा**, मासः मासान् माभ्याम्, द्व्यह्नः। **संख्या-सायवेरह्नस्याहन्** ङौ वा, द्व्यहनि द्व्याह्नि द्व्यह्ने, सायाह्नि व्यहनि। **लुगातोऽनापः** ङीस्याद्यघुट्स्वरे, विश्वपः विश्वपे। मुनिः। **इदुतोऽस्त्रेरीदूत्**, इदुत औता सहेदूतावस्त्रेः, मुनी। **जस्येदोत्** इदुतः, मुनयः। **ह्रस्वस्य गुणः** सिनाऽऽमन्त्र्ये। **गुणोऽरेदोत्** ऋइउवर्णानां, हे मुने मुनीन्। **टः पुंसि ना** इदुतः, मुनिना। **ङित्यदिति**, इदुतोरेदोतावदिति ङिति, मुनये। **एदोद्भ्याम् ङसिङसो रः**, मुनेः २, अकार उच्चारणार्थः। **ङिडौरिदुतः**। **डित्यन्त्यस्वरादेर्लुक्**, स्वरान्तस्य केवलः स्वरो व्यंजनान्तस्यान्त्यव्यंजनयुगन्त्यस्वरश्च लुच्यते, मुनौ मुन्योः मुनिषु। **ऋदुशनस्पुरुदंशोऽनेहसश्च** शेषसेर्डाः, चात्सख्युः, संबोधनवर्ज्यः सिः शेषसिः, सखा। **सख्युरितोऽशावैत्**, इदन्तसखिशब्दस्य शिवर्जिते घुटि ऐत्, सखायौ सखीन्। **न नाङिदेत्** केवलसखिपतेः, सख्या सख्ये। **खितिखीतीय उर्**, खितिखीतीत्येतेभ्यो ङसिङसोरुर् स्यात् चेदे-र्यकारः, सख्युः २। **केवलसखिपतेरौ** ङेः, सख्यौ, पतयः पत्या पत्यौ। भूपतिना भूपतौ। **डत्यन्तः** कतिशब्दः। **डतिष्णः संख्याया लुप्** जश्शसोः। **लुप्यय्वृ ल्लेनेनत्** स्थानिकार्यं, कति कतिभिः कतिषु। बहुवचनान्तः त्रिशब्दः, त्रयः त्रीन् त्रिभिः। **त्रेस्त्रय आमि**, त्रयाणाम्। द्विवचनान्तो द्विशब्दः। **आद्वेरः**, त्यदादीनां द्व्यन्तानामन्त्यस्य अः स्यात्, द्वौ द्वयोः। **क्विब्वृत्तेरसुधियस्तौ**, क्विबन्तवृत्तेरिवर्णोवर्णयोर्य्वौ स्वरे, वातप्रम्यं वातप्रम्या वातप्रम्यि। **दीर्घङ्याब्व्यञ्जनात्से-र्लुक्**, बहुश्रेयसी बहुश्रेयस्यः। **नित्यादिद्द्विस्वराम्बार्थानां ह्रस्व** सिनामन्त्र्ये, हे बहुश्रेयसि। **स्त्रीदूतो ङितां दैदास्दास्दाम्** क्रमेण, बहुश्रेयस्यै बहुश्रेयसीनाम् बहुश्रेयस्याम्। **धातोरिवर्णो-**



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वर्णयोरियुवौ स्वरे,सुधियौ सुधियः सुधियाम् सुधियि । कुमारी-
मिच्छन्कुमारी । योऽनेकस्वरस्येवर्णस्य स्वरे, कुमार्यौ कुमा-
रीणाम् कुमार्याम् । स्त्रिया इवर्णस्येय् स्वरे, अतिस्त्रियौ अतिस्त्रिणा
अतिस्त्रौ । प्रभुः प्रभवः प्रभुणा प्रभूणाम् प्रभौ । क्रुशस्तुनस्तृच्
पुंसि घुटि,क्रोष्टा । तृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्त्रो घुटि
ऋत आर्, क्रोष्टारौ क्रोष्टून् । टादौ स्वरे वा क्रुशस्तुनस्तृच्,क्रोष्ट्रा
क्रोष्टुना । ऋतो डुर् ङसिङसोः, क्रोष्टुः क्रोष्टूनाम् । हूह्वौ
हूहाम् । दृन्पुनर्वर्षाकारैर्भुवो वः स्वरादौ, दृन्भ्वौ, दृम्भून् ।
स्वयम्भुवौ स्वयंभुवाम् स्वयम्भुवि । कर्त्ता कर्तॄन् कर्तुः कर्तॄणाम् ।
अर्ङौ च, ऋतो घुटि ङौ चार्,कर्त्तरि, ना नरौ नुः । नुर्वा नामि
दीर्घः, नृणाम् नॄणाम् । कॄः क्रौ । सेः सयौ । ओत और्घुटि,
सुद्यौः । आ अम्शसोऽता सह, सुद्याम् सुद्याः सुद्योः सुद्यवि ।
आ रायो व्यञ्जने, राः रायौ राभ्याम् रासु । ग्लौः ग्लावौ ग्लौषु ॥
॥ इति स्वरान्तपुंल्लिङ्गाः ॥



आवन्तो मालाशब्दः, माला । औता, आप औता सहैत्,
माले मालाः । एदापः सिनामन्त्र्ये, हे माले मालाः । टौस्येत्
आपः, मालया । आपो ङितां यैयास्यास्याम्, मालायै
मालायाः मालानाम् मालयोः मालायाम् । आत्, स्त्रियामका-
रादाप् ,सर्वा । सर्वादेर्डस्पूर्वाः यैयास्यास्याम् ङिताम् ,सर्वस्यै
सर्वस्याः सर्वस्याम् , द्वितीयस्यै , जरा जरसौ जरे जरसः जराः ,
नासिकया नसा नोभ्याम् । निशा निशाभ्याम् निज्भ्याम् ।
यजसृजमृजराजभ्राजभ्रस्जव्रश्चपरिव्राजः शः षो धुटि
पदान्ते चेति । निशस्तु निड्भ्याम् निड्त्सु । मतिः मती मतयः
मतीः मत्या । स्त्रियां ङितां वा दैदास्दास्दाम् इदुतः, मत्यै
मतेः मत्यां मतौ । त्रिचतुरस्तिसृचतसृ स्यादौ स्त्रियाम् ।
ऋतो रः स्वरेऽनि, तिसृचतस्रोर्नागमवर्जे स्वरे ऋतो रः,
तिस्रः तिसृभिः तिसृणाम् । प्रियास्तिस्रो यस्य तत् । अनतो
लुप् क्लीबे स्यमोः, प्रियतिसृ । अनाम्स्वरे नोऽन्तो नाम्यन्ता-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

नपुंसकात् । औरीः क्लीबे, प्रियतिसृणी । नपुंसकस्य शिर्ज-शसोः । स्वराच्छौ क्लीबे नोऽन्तः। शिर्घुट् क्लीबे। नि दीर्घः, शेषघुट्परे नि दीर्घः, प्रियतिसृणि । वान्यतः पुमाँष्टादौ स्वरे, अन्यतो नपुंसकस्य टादौ स्वरे वा पुंलिङ्गं, प्रियतिस्रा प्रियतिसृणा । द्वे द्वाभ्याम्, नदी नद्यौ, सखी सख्यौ, लक्ष्मीः लक्ष्म्यौ, स्त्री स्त्रियौ । वाऽम्शसि स्त्रिय इवर्णस्येय्, स्त्रीम् स्त्रियम् स्त्रीः स्त्रियः स्त्रियै स्त्रीणाम्, श्रीः श्रियौ श्रियः हे श्रीः । वेयुवोऽस्त्रियाः ङिताम् दैदास्दास्दाम्, श्रियै श्रिये । आमो नाम्वा स्त्री-दूतः इयुवः, श्रीणाम् श्रियाम् , सेनानीः सेनान्यौ सेनानीनाम् । निय आम् ङेः, सेनान्याम् । संयोगात्, धातोः संयोगादि-वर्णोवर्णयोरियुवौ स्वरे, कटप्रुवौ कटप्रुवि । भ्रूश्नोरुवर्णस्योव् स्वरे, भ्रुवौ । स्त्रियां क्रुशस्तुनस्तृच् । स्त्रियां नृतोऽस्वस्रादे-ङीः,क्रोष्ट्री । कवर्गैकस्वरवति उत्तरपदे पूर्वपदरपुरुत्तरपदागम-योर्नस्य णः, पुनर्भूणाम्, स्वसा स्वसारौ। स्वसा दुहिता ननान्दा याता माता तिसृ चतसृ इति स्वस्रादिः । माता मातरौ । इति स्त्रीलिङ्गाः ॥



अतः स्यमोऽम् नपुंसकस्य, कुलं कुले कुलानि । पञ्चतोऽन्या-देरनेकतरस्य दः क्लीबे स्यमोः। विरामे वाऽशिटो धुटः प्रथमः, अन्यद् अन्ये हे अन्यत्, एकतरं अन्यतमं । जरसो वा क्लीबे स्यमोर्लुक्, अतिजरः अतिजरसं अतिजरसी अतिजरे । धुटां प्राक्, क्लीबे धुटां प्राक् छौ नोऽन्तः, अतिजरांसि, हृन्दि हृदा । उद्ना उद्ने, आस्ना आसभ्यः आसनि । क्लीबे ह्रस्वः, कीलाल-पं, वारि वारिणी वारीणि । नामिनो लुग्वा क्लीबे स्यमोः, हे वारे पक्षे हे वारि वारिणा वारिणे वारीणाम् , ग्रामण्या ग्राम-णिना । दध्यास्थिसक्थ्यक्ष्णोऽन्तस्यान् टादौ स्वरे, दध्ना दधनि दध्नि, सुधिया सुधिना, कर्त्रा कर्तृणा, अतिहिना, अति-रिणा अतिराभ्याम्, अतिद्यवे अतिद्युने, अतिनुना अतिनुने, नात्र पुंलिङ्गं । इति नपुंसकलिङ्गम् ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हो धुट्पदान्ते ढः, लिट् लिहौ लिड्त्सु । भ्वादेर्दादेर्घः हस्य धुट्पदान्ते । गडदबादेश्चतुर्थान्तस्यैकस्वरस्यादेश्चतुर्थः स्ध्वोश्च, प्रत्यये, चात् पदान्ते, धुग् धुक् । द्रुहमुहस्नुहस्निहो वा घः धुट्पदान्ते, धुग् धुक् धुट् धुड् धुक्षु धुड्त्सु । वाः शेषे, अनडुह्चतुरोरुकारस्य वाकारः शेषघुटि । अनडुहः सौ धुटः प्राग्नोऽन्तः । पदस्य, पदान्ते संयोगान्तस्य लुक्, अनड्वान् अनड्वाहौ । उतोऽनडुच्चतुरो वः आमन्त्र्ये, हे अनड्वन् अनडुहा । स्रंसध्वंसक्वस्सनडुहो दः धुट्पदान्ते, अनडुद्भ्याम् अनडुत्सु । दिव औः, दिवो व औः सौ, द्यौः दिवौ । उः पदान्तेऽनूत्, पदान्ते दिवो व उद्भवति, न च दीर्घः, द्युभ्यां, चत्वारः चतुरः । संख्यानां र्ष्णाम्, रषनान्तसंख्याया आमो नाम्, चतुर्णाम् । मो नो म्वोश्च धातोः चात् पदान्ते, प्रशान् प्रशामौ । किमः कस्तसादौ च, चात्स्यादौ, कः के कस्मिन् केषु । अयमियं पुंस्त्रियोरिदमः, अयम् । दो मः स्यादाविदमः, इमे । टौस्यन इदमः, अनेन । अनक्, अनक् इदम् अत्स्याद्यव्यञ्जने, आभ्याम्, अनगिति इमकाभ्याम्, एभिः । इदमदसोऽक्येव भिस ऐस्,इमकैः । इदमः, प्रागुद्दिष्टस्य पुनर्विधानलक्षणेऽन्वादेशे इदम एनत्स्यात् द्वितीयाटौसि, न चेद् वृत्त्यन्ते, वृत्तिश्च परार्थाभिधानं समासादिः, उद्दिष्ट आचारोऽथैनमनुजानीत, एनान् एनयोः । अद्व्यञ्जने, साक इदमोऽद्भवति व्यञ्जने परेऽन्वादेशे, इमकस्मै उद्दिष्टमथास्मै समुद्दिशत, राजा । नामन्त्र्ये नलुक्, हे राजन् राजनि राज्ञि । भ्वादेर्नामिनो दीर्घो र्वोर्व्यञ्जने, धातोर्नामिनो दीर्घो व्यञ्जनपरयो रवयोः, प्रतिदीवा प्रतिदीव्नः । न वमन्तसंयोगादनोऽस्य लुक्, तत्त्वदृश्वनः । इन्हन्पूषार्यम्णः शिस्योर्दीर्घः शेषे,वृत्रहा वृत्रहणौ । हनो ह्नो घ्नः । हनो घि न णः, वृत्रघ्नः, दण्डी, पूषा अर्यम्णि । श्वन्युवन्मघोनो ङीस्याद्यघुट्स्वरे व उः, शुनः शुनि श्वसु । पथिन्मथिन्नृभुक्षः सौ



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

आः। एः, पथ्यादीनामेरा घुटि। थो न्थ् पथिन्मथिनोर्घुटि, पन्थाः पन्थानौ। इन्ङीस्वरे, पथिन्मथिनोरिनो लुक् ङीस्वरे, पथः पथिभ्याम् पथि, नन्ता संख्याऽलिङ्गेति त्रिषु समानः पञ्चन्, पञ्च पंचानाम् पंचसु। वाष्टन आः स्यादौ। अष्ट और्जश्शसोः, अष्टौ अष्ट अष्टानाम्। सुत् सुद् सुधौ सुद्भ्याम्। युजोऽसमासे घुटि प्राग्नोऽन्तो धुटः। युजञ्चक्रुञ्चो नो ङः पदान्ते, युङ् युञ्जौ। चजः कगम् धुटपदान्ते, युग् युक्षु। निमित्ताभावे नैमित्तिकाभावः खन् खञ्जौ खन्सु, राट् राड् परिव्राट्। वसुराटोर्दीर्घः विश्वस्य, विश्वाराट् विश्वराजौ। संयोगस्यादौ स्कोर्लुग् धुट्पदान्ते, साधुलग् साधुलग्भ्याम्। ऋत्विज्दिग्दृशस्पृग्स्रज्दधृषुष्णिहो गः पदान्ते, ऋत्विक्। रात् स एव पदान्ते लुक्, ऊर्क् ऊर्क्षु। (आङ्केरः) लुगस्यादेत्यपदे। तः सौ सस्त्यदादीनां व्यन्तानां, सः ते तस्मै, त्ये त्येषु, यः येषाम् यस्मिन्। त्यदामेनदेतदोऽवृत्त्यन्तेऽन्वादेशे द्वितीयाटौसि,

सुशीलावेतकावथैनो गुरवो मानयन्ति, एनेन एनयोः। यस्वरे पादः पदणिक्यघुटि स्वरे, द्विपदः द्विपाद्भ्याम्। अश्चोऽनर्चायामेव नो लुक् क्ङिति। अचः, घुट्यचः धुटः प्राग्नोऽन्तः, प्राङ्। अञ्चू प्राग्दीर्घश्चाणिक्यघुटि यस्वरे, प्राचः, प्रांचः, प्रतीचः प्रत्यक्षु। उदच उदीच् अणिक्यघुटि यस्वरे, उदीचः। सहसमः सध्रिसमि क्विवन्तेऽञ्चतौ, सध्रीचः सध्रीचि, समीचा। तिरसस्तिर्यति, क्व्यश्चतेरकारे तिरसस्तिरिः, तिर्यङ् तिरश्चः, कुङ् कुङ्क्षु, पयोमुक् पयोमुग्भ्याम्। ऋदिन्महत्। ऋदुदितः धुटः प्राग् नोऽन्तो घुटि। न्सूमहतो दीर्घः शेषे घुटि, महान् महान्तम्। उदित् धीमत्। अभ्वादेरत्वसः सौ शेषे दीर्घः, धीमान्। अन्तो नो लुक् द्व्युक्तजक्षपंचकस्य, ददत् जक्षत् जाग्रत् दरिद्रत् चकासत्, यादृक् यादृक्षु। नशो वा गः पदान्ते, नग् नक् नट् नड्, षड् षण्णाम्। क्वसुष्मतौ च चादणिक्यघुटि यस्वरे, विदुषः विद्वत्सु, सेदिवान् सेट्क्वसोरुष् सेदुषः, सुहिन्, धातुत्वान्-



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

न्सिति दीर्घः, सुहिंसौ । पुंसोः पुमन्स् धुटि, पुमान् पुमांसौ पुंसः पुंसु, उशनाः । वोशनसो नश्चामन्त्ये लुक् चात्सः, पक्षे हे उशनन् हे उशनः । अदसो दः सेस्तु डौः, अदसो दः सः सौ सेस्तु डौः, असौ । असुको वाऽकि सौ, असुकः असकौ । मोऽवर्णस्य, अवर्णान्तस्यादसो दो मः । मादुवर्णोऽनु, अदसो मात्परस्य यथामात्रमुवर्णः पश्चात्, अमू । बहुष्वेरीः, अदसो मादेरीर्बहुत्वे, अमी । प्रागिनात्मादुवर्णोऽदसः, अमुना अमुष्मात् अमीषु, श्रेयान् श्रेयांसौ ॥ इति व्यञ्जनान्तपुंल्लिङ्गाः ॥

नहाहोर्धतौ, नहाहयोर्हस्य क्रमेण धतौ धुटि प्रत्यये पदान्ते च, परीणद् परीणद्भ्याम्, उष्णिग्भ्याम् उष्णिक्षु, गीः गीर्भ्याम् गीर्षु, चतस्रः चतसृणाम्, का के कासु, इमाः अनया एनयोः आसाम्, स्रग् स्रक्, एषा एतस्याम्, वाग्भ्याम् वाक्षु, अप्-शब्दो बहुवचने । अपः शेषे घुटि दीर्घः, आपः । अपो द्भे स्यादौ, अद्भिः, दिक् दिग्, दृग्भ्याम् दृक्षु, त्विषा त्विड्सु । सजुषः पदान्ते रुः, सजूः सजुषौ सजूष्षु सजूःषु, असौ अमूः अमुया अमूषाम् अमुष्याम् । इति स्त्रीलिङ्गाः ।

स्वनडुत् स्वनडुही स्वनड्वांहि, विमलद्यु विमलदिवि, वाः वारी वार्षु, इदम् इमानि अस्मात्, अहः अहनी अह्नी अहानि अहोभ्याम्, दाम । क्लीबे वामन्त्ये नलुक्, हे दामन् हे दाम, असृक् असृंजि अस्ना असृसु । लों वा, लेपरधुडन्तस्य धुटः प्राग्वा नोऽन्तः, बहूर्ञ्जि बहूर्जि, यद् ये येषाम्, एतद् एनेन, तिर्यक् तिरश्ची, तिर्यश्ची, यकृत् यकानि यकूना, शकृन्ति शकृभ्याम्, जक्षती । शौ वा द्व्युक्तजक्षपञ्चकयोः शौ वान्तो नो लुक्, जक्षन्ति जक्षति, भात् । अवर्णादश्नोऽन्तो वाऽतुरीङ्योः, श्नावर्जादवर्णादतुरन्तो वा ईङ्योः, भान्ती भाती । श्यशवः अतुरन्त ईङ्योः, भवन्ती, दीव्यन्ती दीव्यता । नि वाऽपो दीर्घः, स्वम्पि स्वाम्पि, सर्पिः सर्पिषी सर्पींषि सर्पिष्षु, पिपठीः पिपठिषी पिपठिषि, सुपुम् सुपुमांसि, अदः अमूनि । ॥ इति



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

व्यञ्जनान्तनपुंसकलिङ्गाः ॥

त्वमहं सिना प्राक् चाकः सह युष्मदस्मदोः, त्वम् अहम्, त्वकम्। मन्तस्य युवावौ द्वयोः, मन्तयुष्मदस्मदोर्द्वित्वे युवावौ स्याताम्। अमौ मः व्यञ्जनादिप्रत्यये आः, युवाम् आवाम्। यूयं वयं जसा, यूयम् वयम् यूयकं। त्वमौ प्रत्ययोत्तरपदे चैकस्मिन्, त्वाम् माम् युवाम् आवाम्। शसो नः, युष्मान् अस्मान्। टाङ्योसि यः, त्वया मया युवाभ्याम् आवाभ्याम् युष्माभिः अस्माभिः। तुभ्यं मह्यं ङया, तुभ्यम् तुभ्यकं मह्यम् युवाभ्याम् आवाभ्याम्। शेषे लुक् अनाये स्यादौ। अभ्यम् भ्यसः, युष्मभ्यम् अस्मभ्यम्। ङसेश्चात् पञ्चम्याश्चाद् भ्यसः, त्वत् मत् युवाभ्याम् आवाभ्याम् युष्मत् अस्मत्। तव मम ङसा, तव मम तवक युवयोः आवयोः। आम आकम्, युष्माकम् अस्माकम् त्वयि मयि युवयोः आवयोः युष्मासु अस्मासु। अविशेषणे द्वौ चास्मदः, अस्मद एको द्वौ च बहुवद्वा, न चेद्विशेषणयुतः, अहम् आवाम् वयम्। सविशेषणमाख्यातं वाक्यम्। पदाद् युग्विभक्त्यैकवाक्यै वस्नसौ बहुत्वे, पदात्परयोरेकवाक्ये बहुत्वे युष्मदस्मदोर्द्वितीयाचतुर्थीषष्ठीलक्षणयुग्विभक्त्या सह वस्नसौ स्याताम्। द्वित्वे वाम्नौ युग्विभक्त्या। ङेङसा ते मे। अमा त्वा मा। धर्मः त्वा मा वां नौ वो नो वा रक्षतु, शीलं तं मे वां नौ वो नो वा दीयते, ज्ञानं ते मे वां नौ वो नो वा स्वम्। असदिवामन्त्र्यं पूर्वम्, श्रमणा युष्मान् रक्षतु धर्मः। जस्विशेष्यं वामन्त्र्ये, विशेषणपरं जसन्तं विशेष्यमामन्त्र्ये वाऽसद्, जिनाः शरण्या युष्मान् वो वा शरणं प्रपद्ये। नान्यत् विशेष्यमसदिव, साधू सुविहितौ वां शरणं प्रपद्ये। पादाद्योः नैते वसादयः, वीरो विश्वेश्वरो देवो, युष्माकं कुलदेवता। स एव नाथो भगवानस्माकं पापनाशनः ॥ १ ॥ चाहहवैवयोगे न वसादयः, ज्ञानं तुभ्यं च दीयते। दृश्यर्थैश्चिन्तायाम् नैते, ज्ञानं मामपेक्षते। नित्यमन्वादेशे वसाद्याः,



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

त्वं विद्वानथो ते क्षमाश्रमणैर्ज्ञानं दीयते। सपूर्वात्प्रथमान्ताद्वाऽन्वादेशे वसाद्याः, धनवाँस्त्वमथो लोकः त्वां त्वा वाऽर्चयते। इति त्रिषु सरूपे युष्मदस्मदी।

स्वराद्योऽव्ययम्, स्वर् अन्तर् प्रातर् पुनर् ह्यस् श्वस् स्वस्ति समया निकषा उच्चैस् नीचैस् शनैस् द्राक् ईषत् नमस् आविस् प्रादुस् इत्यादीनि। सदृशं त्रिषु लिङ्गेषु, सर्वासु च विभक्तिषु। वचनेषु च सर्वेषु, यन्न व्येति तदव्ययम् ॥ १ ॥ चाद्योऽसत्त्वेऽव्ययम्, च वा एव एवम् नूनम् स्वाहा भोस् भगोस् अघोस् ननु इव खलु जातु यावत् तावत् अमा सार्धम् अ आ इ ई उ ऊ ए ऐ ओ औ। प्र परा अप सम् अनु अव निस् दुस् आङ् नि वि प्रति परि उप अधि अपि सु उद् अति अभि इत्युपसर्गाः। विभक्तिथमन्ततसाद्याभाः, अहंयुः कथम् कुतः तथेत्याद्याः। तस् त्रप् दैद्युस् द्युस् र्हि था धा कृत्वस् सुच् रि रिष्टात् अस् स्तात् अतस् आ आहि एन च्वि स्सात् त्रा डाच् प्शस् एतदन्तमव्ययं, सर्वस्मादिति सर्वतः इतः अतः कुतः सर्वविभक्तावप्ययं यस्मादिति यतः कस्मिन्निति कुत्र क्व कुह अस्मिन्निति अत्र इह। कस्मिन् काले कदा यदा तदा सर्वदा एकदा अन्यदा सर्वस्मिन् काले सदा अधुना इदानीम् एतर्हि समानेऽहनि सद्यः अद्य परेद्यवि पूर्वस्मिन्नहनि पूर्वेद्युः इतरेद्युः उभयेद्युः। अस्मिन्वर्षे ऐषमः परुत् परारि। कस्मिन् काले कर्हि। सर्वैः प्रकारैः सर्वथा कथम् इत्थम्। द्वाभ्याम् प्रकाराभ्याम् द्विधा। द्वे वारे द्विः त्रिः चतुः द्विकृत्वः सकृत्। प्रथमापञ्चमीसप्तमीषु उपरि उपरिष्टात् पुरः पुरस्तात् अधः अधस्तात् परस्तात् दक्षिणतः दक्षिणात् पश्चिमात्, दक्षिणस्यां दूरे इति दक्षिणा दक्षिणाहि। प्रागसत उत्पादे च्विः, अशुक्लं शुक्लं करोति शुक्लीकरोति च्वेः कृभ्वस्। च्वावचर्णस्येः, क्वचित्सलोपो दीर्घश्च अरूभवति। व्याप्तौ स्सात्, अग्निसात्करोति। आचार्येऽधीन आचार्यसात् करोति। दे-



P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

ये त्रा च आचार्यत्राकरोति । अर्थविशेषे शब्दविशेषात् डाच् द्वितीयाकरोति । बह्वल्पार्थात् कारकादिष्टानिष्टे प्शस् बहुशो भुक्तं । वत्तस्यामन्तं च , देववन्मुनिं नमति । क्रियायां वत् । षष्ठीसप्तम्योरपि । तुल्यदिशि तसि, हिमवता तुल्यदिशि हिमवत्तः । किन्त्याद्येऽव्ययात्तरप्तमपोराम् , किन्तराम् उच्चैस्तमाम् । प्रकृष्टे तमप् , द्वयोर्विभागे तरप् । क्त्वातुममन्तं चाव्ययं । प्राक्काले तुल्यकर्तृकाद्धातोः क्त्वा, भुक्त्वा व्रजति । अनञः क्त्वो यप् समासे, नेत्रे निमील्य हसति । ख्णम् चाभीक्ष्ण्ये प्राक्काले चात् क्त्वा । भृशाभीक्ष्ण्याविच्छेदे द्विः, भोजं भोजं भुक्त्वा वा व्रजति । क्रियायां क्रियार्थायां तुम्णकच्भविष्यन्ती, भोक्तुं भोजको भोक्ष्य इति वा व्रजति । गतिः अव्ययम् । धातोः पूजार्थस्वतिगतार्थावधिपर्यतिक्रमार्थातिवर्जः प्रादिरुपसर्गः स च धातोः प्राक् । धात्वर्थं बाधते कश्चित्कश्चित्तमनुवर्त्तते । तमेव विशिनष्ट्यन्योऽनर्थकोऽन्यः प्रयोज्यते ॥ १ ॥ प्रतीक्षते अधीते प्राणिति विजयते । ऊर्याद्यनुकरणच्विडाचश्च, अनुकरणा ऊर्याद्याः च्विडाजन्तं उपसर्गाश्च धातोः प्राक् गतिसंज्ञाश्च, ऊरीकृत्य पटपटाकृत्य । कारिकालंसदसत्अन्तरदःकणेमनःपुरोऽस्तंतिरस्मध्येपदेनिवचनेमनस्युरसिउपाजेऽन्वाजेऽधिसाक्षादादिहस्तेपाणौप्राध्वंजीविकेत्याद्या अर्थविशेषे गतिसंज्ञकाः । अव्ययस्य स्यादेर्लुप् । अवाप्योर्वपी अवतंसः पिधानं ॥ इत्यव्ययानि ॥

अजादेः स्त्रियामाप्, अजा एडका अश्वा चटका कन्या मन्दा ज्येष्ठा त्रिफला । राज्ञी । अधातूदृदितो ङीः, विदुषी पचन्ती अतिमहती । असत्काण्डप्रान्तशतैकाञ्चपुष्पाद् ङीः, शङ्खपुष्पी प्राक्पुष्पी । सत्पुष्पा । असम्भस्त्राजिनैकशणपिण्डात्फलात्, पूगफली । अनञो मूलात् दर्भमूली । अञ्चः, प्राची उदीची । णस्वराघोषाद्वनो रश्च, णस्वराघोषाद्वनो ङीर्नश्च रः, अवावरी धीवरी । वा बहुव्रीहेः बहुधीवा बहुधीवरी । वा पादः बहुव्रीहे-



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

ङीः, द्विपदी । सुसंख्यात्पादस्य पात्, द्विपात् । ऊध्नः महोध्नी
आशिध्नी । संख्यादेर्हायनाद्वयसि । अस्य ङ्यां लुक् ,द्विहायनी
गौः । चतुस्त्रेर्हायनस्य णः, चतुर्हायणी अश्वा । दाम्नः संख्यादे-
र्बहुव्रीहेः,द्विदाम्नी । अनो वोपान्त्यलोपिनः,बहुराज्ञी बहुराजा ।
नाम्नि, अधिराज्ञी । नोपान्त्यवतः, सुपर्वा । मनन्तान्न, सीमा ।
ताभ्यां वाप् डित् अनो बहुव्रीहेर्मनश्च, सीमानौ सीमे, बहुराजे
बहुराज्यौ । ड्यादीदूतः के ह्रस्वः । न कचि । नवाऽऽपः । इच्चा-
पुंसोऽनित्क्याप्परे, आप्परेऽनितिक अपुंसो ह्रस्व इश्च, खट्विका
खट्वका खट्वाका । स्वज्ञाजभस्त्राधातुत्ययकात्, धातु-
त्यवर्जयकान्तात्स्वादेश्चानित्क्याप्परे इर्वा पक्षे च ह्रस्वः, स्विका
स्वका मूषिकिका मूषकका । दून्येषसूतपुत्रवृन्दारकस्येर्वा, द्विके
द्वके । वौ वर्त्तिका । अस्यायत्तत्क्षिपकादीनामिः, कारिका ।
नरिका मामिका । तारका ज्योतिषि, वर्णका तान्तव, अष्टका
पितृदैवत्ये । गौरादिभ्यो ङीः स्त्रियां, गौरी अमरी सुन्दरी दासी
पुत्री मनुषी बदरी अतसी हरितकी शमी नदी । वयस्यनन्त्ये
ङीः, कुमारी वधूटी । परिमाणात्ताद्धितलुक्यबिस्ताचितकम्बल्यात् ङीर्द्विगोरतः,
द्वाभ्यां कुडवाभ्यां क्रीता द्विकुडवी । काण्डात्क्षेत्रे, द्विकाण्डी ।
पुरुषाद्वा, द्विपुरुषी । रेवतरोहिणाद्भे, रेवती रोहिणी । नीला-
त्प्राण्योषध्योः, क्ताच्च नाम्नि वा ङीः चान्नीलात्, नीला नीली
प्रवृद्धविलूनी प्रवृद्धविलूना । केवलमामकभागधेयपापा-
परसमानार्यकृतसुमंगलभेषजात् नाम्नि । द्विगोः समा-
हारात् अतः, पंचाजी । अणञेयेकण्नञ्स्नञ्टिताम् ङीः, औप-
गवी औत्सी शैलेयी आक्षिकी स्त्रैणी पौंस्नी शुनिंधयी । भाज-
गोणनागस्थूलकुण्डकालकुशकामुककटकबरात् पक्वा-
वपनस्थूलाकृत्रिमामत्रकृष्णायसीरिरंसुश्रोणिकेशपाशे
ङीः । नवा शोणादेर्ङीः, शोणी विशाली ध्वजी कल्याणी ।
इतोऽक्त्यर्थात् वा ङीः, धूली धूलिः । पद्धतेर्वा । शक्तेः शस्त्रे
वा । स्वराद्रुतो गुणादखरोः, स्वरात्परस्य खरुवर्जितस्य गुण-



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

वाचकोदन्ताद् ङीर्वा, पट्वी पटुः। श्येतैतहरितभरतरोहिताद्वर्णात् ङीर्वा तो नश्च, श्येनी श्येता। क्नः पलितासिताद् ङीर्वा नश्च, पलिक्नी असिता असिक्नी। असहनञ्विद्यमानपूर्वपदात्स्वाङ्गादक्रोडादिभ्यो वा ङीः, अतिकेशी अतिकेशा। नासिकोदरोष्ठजंघादन्तकर्णशृंगांगगात्रकण्ठाद्वा ङीः, सुनासिकी सुनासिका, नान्यबहुस्वरसंयोगोपान्त्येभ्यः। नखमुखादनाम्नि वा, सुमुखी सुमुखा। पुच्छात्, सुपुच्छी सुपुच्छा। कबरमणिविषशरादेः, शरपुच्छी। पक्षाच्चोपमानादेः चात्पुच्छात्, उलूकपुच्छी। क्रीतात्करणादेः, वस्त्रक्रीती। क्तादल्पात्करणादेः, अल्पार्थात् क्तान्तात्करणादेर्ङीः, अभ्रविलिप्ती। स्वांगादेरकृतमितजातप्रतिपन्नाद्बहुव्रीहेः, उरुभिन्नी। अनाच्छादजात्यादेर्नवाऽकृतादिक्तान्तात्, शांगरजग्धी शांगरजग्धा। पत्युर्नः। बहुव्रीहेर्वा ङीः, दृढपत्नी दृढपतिः। सादेः, अधिपत्नी अधिपतिः। सपत्न्यादयः, सैकवीरापिण्डभ्रातृपुत्रेभ्यः।



ऊढायाम् पत्नी। पाणिगृहीती ऊढायाम्। पतिवत्न्यन्तर्वत्न्यौ भार्यागर्भिण्योः। जातेरयान्तस्त्रीशूद्रात्, कुक्कुटी पात्री। पाककर्णपर्णवालान्ताज्जातेः, अश्ववाली। धवाद्योगादपालकान्तात्, प्रष्ठी। पूतक्रतुवृषाकप्यग्निकुसितकुसिदात् ङीरैच् वान्त्यस्य, पूतक्रतायी। मनोरौ च वा चादैः, मनुः मनावी मनायी। वरुणेन्द्ररुद्रभवशर्वमृडादू आन् चान्तः, मृडानी। मातुलाचार्योपाध्यायाद्वा, मातुलानी मातुली। सूर्याद्देवतायां वा, सूर्याणी सूर्या। यवयवनारण्यहिमाद्दोषलिप्युरुमहत्त्वे, यवानी यवनानी अरण्यानी हिमानी। अर्यक्षत्रियाद्वा। यञो डायन् च वा, गार्ग्यायणी। व्यंजनात्तद्धितस्य ङ्यां लुक्, गार्गी। लोहितादिशकलान्तात्, शाकल्यायनी। षावटाद्वा, गौकक्ष्यायणी। कौरव्यमण्डुकासुरेः, आसुरायणी। इञ इतः, सौतंगमी। नुर्जातेरितो ङीः, दाक्षी। उतोऽप्राणिनश्चायुरज्ज्वादिभ्य ऊङ्, उदन्तनृजातेरूङ् युरज्ज्वादिवर्जा-



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

याः अप्राणिनश्च, कुरूः। बाह्वन्तकद्रुकमण्डलोर्नाम्नि, मद्रबाहूः। उपमानसहितसंहितसहशफवामलक्षणाद्युरोरूङ्, वामोरूः॥ नारी सखी पंगू श्वश्रूः। युनस्तिः युवतिः। अनार्षे वृद्धेऽणिञो बहुस्वरगुरूपान्त्यस्यान्त्ये ष्यः, दैवदत्त्या। कुलाख्यानाम्, पौणिक्या। क्रौड्यादीनाम्, क्रौड्या लाड्या। भोजसूतयोः क्षत्रियायुवत्योः। दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेविद्धेर्वा ष्यः। सूर्यागस्त्ययोरीये च यो लुक् चाद् ङ्यां, सूर्यस्य मानुषी स्त्री सूरी, सौरी प्रभा ॥ इति स्त्रीप्रत्ययाः ॥

नाम्नः प्रथमैकद्विबहौ, एकद्विबहुत्वे नाम्नः स्यौजस् रूपा प्रथमा, देवः। क्रियाहेतुः कारकम्, कर्त्ता कर्म च करणं, संप्रदानं तथैव च। अपादानाधिकरणे, इत्याहुः कारकाणि षट् ॥ १ ॥ स्वतन्त्रः कर्त्ता क्रियायाम्, करोति कारयति वा घटं मैत्रः। कर्त्तुर्व्याप्यं कर्म, कटं करोति कारुको, रूपं पश्यति चाक्षुषः। राज्यं प्राप्नोति धर्मीष्ट, इष्टानिष्टेतरत्तु तत् ॥ १ ॥

दुह्यादीनां क्रियार्थरूपे प्रधाने व्याप्ये नीवहादीनां त्वप्रधाने, गां दोग्धि पयः, अजां नयति ग्रामम्। वाऽकर्मणामणिक्कर्त्ता णौ कर्म, स्थापयति मैत्रं मैत्रेण वा। गतिबोधाहारार्थशब्दकर्मनित्याकर्मणामनीखाद्यदिह्वाशब्दायक्रन्दां अणिक्कर्त्ता णौ कर्म, आसयति चैत्रम्। भक्षेर्हिंसायाम्, भक्षयति सस्यं बलीवर्दान्। वहेः प्रवेयः, वाहयति बलीवर्दान्। हृक्रोर्नवा, विहारयति देशं चैत्रं चैत्रेण वा। दृश्याभिवदोरात्मने, दर्शयते भृत्यान् भृत्यैर्वा। नाथ आत्मने, सर्पिषः सर्पिर्वा नाथते। स्मृत्यर्थदयेशः, मातुर्मातरं वा ध्यायति। कृगः प्रतीयत्ने, एधोदकस्यैधोदकं वोपस्कुरुते। रुजार्थस्याज्वरिसंतापेर्भावे कर्त्तरि, चौरस्य चौरं वा व्यथयति रोगः। जासनाटक्राथपिषो हिंसायां। निप्रेभ्यो घ्नः। विनिमेयद्यूतपणं पणव्यवहोः। उपसर्गाद्दिवो वा। नानुपसर्गस्य दिवः, शतस्य दीव्यति। करणं च चात्कर्म, दिवेर्व्याप्यं करणं कर्म च, अक्षैरक्षान्वा दीव्यति।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अधेःशीङ्स्थास आधारः,ग्राममधिशेते। उपान्वध्याङ्वसः, ग्राममुपवसति। वाभिनिविशः।कालाध्वभावदेशं वाऽकर्म चाकर्मणां चात्कर्म, मासं मासे वाऽऽस्ते। कर्मणि द्वितीया, भीष्मं कटं करोति। क्रियाविशेषणात् द्वितीया, क्रियाव्यय-विशेषणे क्लीबता, सयुक्तिकं भाषते।कालाध्वनोर्व्याप्तौ, मास-मधीते। गौणात्समयानिकषाहाधिगन्तरान्तरेणातियेन-तेनैः, अतिवृद्धं कुरून्, अन्तरा निषधं नीलं च विदेहाः। द्वित्वेऽधोऽध्युपरिभिः, उपर्युपरि ग्रामं। सर्वोभयाभिप-रिणा तसा, परितो ग्रामं। लक्षणवीप्स्येत्थंभूतेष्वभिना, वृक्षमभि मातरमभि। भागिनि च प्रतिपर्यनुभिश्चाह्लक्ष-णादौ, यदत्र मां प्रति तद्दीयताम्। हेतुसहार्थेऽनुना,अनु जिन-जन्मागच्छद्देवेन्द्रः। उत्कृष्टेऽनूपेन, अनुहेमचन्द्रं वैयाकरणाः। साधकतमं करणं क्रियासिद्धौ, संवरेण निर्जरयाऽऽप्नोति मोक्षं। हेतुकर्तृकरणेत्थंभूतलक्षणे, धनेन कुलं चैत्रेण कृतम् मनसा

ध्यातम् ईर्यया साधुः। सिद्धौ तृतीया कालाध्वनोः, मासेना-धीतः। सहार्थे, समं शिष्येण। यद्भेदैस्तद्वदाख्या, निसर्गेण प्राज्ञः। कृताद्यैर्निषेधार्थैः, तेन कृतं। काले भाद्नवाधारे, मघासु मघाभिर्वा पललौदनम्। प्रसितोत्सुकाववद्धैर्वा, गृहेण गृहे वोत्सुकः। सज्ञो ज्ञोऽस्मृतौ, मात्रा मातरं वा संजानीते। दाम्नः संप्रदानेऽधर्म्ये समः,दास्या संप्रयच्छते। कर्माभिप्रेयः संप्रदानं, देवेभ्यो नमति। स्पृहेर्व्याप्यं वा, गुणेभ्यो गुणान्वा स्पृहयाति। क्रुद्द्रुहेर्ष्यासूयार्थैर्यं प्रति कोपः,रुष्यति मैत्राय। नोपसर्गात्क्रुद्द्रुहा, मैत्रमभिक्रुध्यति। चतुर्थी संप्रदाने, ददाति भिक्षां मुनिभ्यः। तादर्थ्ये, कुण्डलाय हिरण्यम्। रुचि-कृप्यर्थधारिभिः प्रेयविकारोत्तमर्णेषु, मैत्राय रोचते धर्मः। प्रत्याङः श्रुवार्थिनि, याचकाय द्रम्मान् प्रतिशृणोति। प्रत्य-नोर्गृणाऽऽख्यातरि,आचार्यायानुगृणाति। यद्वीक्ष्ये राधीक्षी, स्त्रीभ्य ईक्षते। उत्पातेन ज्ञाप्ये, वाताय कपिला विद्युत्।





P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

श्लाघह्नुस्थाशपां, मैत्राय श्लाघते। तुमोऽर्थे भाववचनात्, पाकाय व्रजति। गम्यस्याप्ये तुमः, फलेभ्यो याति। गतेर्नेवाऽनाप्ते, ग्रामाय ग्रामं वा व्रजति। हितसुखाभ्यां वा, चैत्राय चैत्रस्य वा सुखम्। तद्भद्रायुष्यक्षेमार्थेनाशिषि वा, श्रमणेभ्यः श्रमणानां वा सुखमस्तु। शक्तार्थवषट्नमःस्वास्तिस्वाहास्वधाभिः, स्वस्ति संघाय। अपायेऽवधिरपादानम्। पंचम्यपादाने, ग्रामादागच्छति शृंगाच्छरः। आङावधौ आपाटलिपुत्राद् वृष्टिः। पर्यपाभ्यां वर्ज्ये, अपपाटलिपुत्राद् वृष्टिः। आख्यातर्युपयोगे, उपयोगो नियमपूर्वकं विद्याग्रहणं, उपाध्यायादधीते। गम्ययपः कर्माधारे, आसनात् हर्म्याद्वा प्रेक्षते। प्रभृत्यन्यार्थदिक्शब्दबहिराराद्दितरैः, आरभ्य ग्रीष्मात्, चैत्राद्भिन्नः। ऋणाद्धेतोः, शताद्बद्धः। गुणादस्त्रियां हेतोर्नवा, जाड्याज्जाड्येन वा बद्धः। आराद्र्थैर्वा, आसन्नं ग्रामाद् ग्रामस्य वा। स्तोकाल्पकृच्छ्रकतिपयादसत्त्वे करणे वा, स्तोकेन स्तोकाद्वा मृतः। अज्ञाने ज्ञः, सर्पिषो जानीते। शेषे षष्ठी, राज्ञः पुरुषः। रिरिष्टात्स्तादस्तादसतसाता, पश्चाद् ग्रामस्य। कर्मणि कृतः, कर्त्ता तीर्थस्य। द्विषो वाऽतृशः, चौरस्य चौरं वा द्विषन्। वैकत्र द्वयोः कर्मणोः, अजायाः अजां वा स्रुघ्नस्य स्रुघ्नं वा नेता। कर्त्तरि कृतः, भवतः स्वापः। द्विहेतोरस्त्र्यणकस्य, स्त्र्यणकवर्जकर्मकर्त्तृषष्ठीहेतोः कृतो वा कर्त्तरि षष्ठी, साध्वी निर्युक्तयाः कृतिर्भद्रबाहोर्भद्रबाहुना वा। कृत्यस्य वा, भवतो भवता वा कार्यः। नोभयोः, नेतव्या ग्राममजा चैत्रेण। तृन्नुदन्ताव्ययक्वस्वानातृश्शतृङिणकच्खलर्थस्य नोभयहेतोः षष्ठी, श्रद्धालुस्तत्त्वं अधीयँस्तत्त्वार्थं। क्तयोरसदाधारे न, कटं कृतवान्। वा क्लीबे क्तस्य, नृत्तं केकिनः केकिना वा। अकमेरुकस्य न कर्मणि, भोगानभिलाषुकः। एष्यदृणेनः, ग्रामं गमी शतं दायी। क्रियाश्रयस्याधारोऽधिकरणं। सप्तम्यधिकरणे, दिवि देवाः कटे बालः तिले तैलं वटे करी सीम्नि पुष्क-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

लकोंऽगुल्यां करी, पोढा मन्तव्यमिदम्। कुशलायुक्तेन, कुशलो विद्याग्रहणे। स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैर्वा, गवां गोषु वा स्वामी। व्याप्ये क्तेनः, आम्नाती श्रुते। तद्युक्ते हेतौ, व्याप्ययुक्ते, चर्माणि द्वीपिनं हन्ति। यद्भावो भावलक्षणं, गोषु दुग्धासु गतः। षष्ठी वाऽनादरे, रुदति रुदतो वा प्राव्राजीत्। सप्तमी चाविभागे निर्धारणे, श्रेष्ठो जिनेषु तीर्थकृत्। पृथग्नाना पञ्चमी च चात्तृतीया, पृथग्ज्ञानाज्ज्ञानेन वा। ऋते द्वितीया च चात्पञ्चमी, धर्माद्धर्मं वा ऋते कुतः सुखं?। विना ते तृतीया च, वातं वातेन वाताद्वा विना वर्षं। तुल्यार्थैस्तृतीयाषष्ठ्यौ, गुरुणा गुरोर्वा समः। हेत्वर्थैस्तृतीयाद्याः। सर्वादेः सर्वाः। आरादर्थाद्दाङसिङ्यम्, दूरं दूरेण दूराद् दूरे वा ग्रामाद् गामस्य वा। ॥ इति कारकाणि ॥

नाम नाम्नैकार्थ्ये समासो बहुलं, समानाधिकरणे नाम नाम्ना सह समस्यते। ऐकार्थ्ये समासे स्यादेर्लुप्। विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिपश्चात्क्रमख्यातियुगपत्सदृक्संपत्साकल्यान्तेऽव्ययं समस्यतेऽव्ययीभावश्चासौ, स्त्रीष्विति। प्रथमोक्तं समासशास्त्रे प्राक्। अनतो लुप् अव्ययीभावात्स्यादेः। द्वन्द्वैकत्वाऽव्ययीभावौ क्लीबे, अधिस्त्रि, कुम्भस्य समीपं उपकुम्भं। अमव्ययीभावस्यातोऽपञ्चम्याः, उपकुम्भं उपकुम्भात्। वा तृतीयायाः। वाऽम् सप्तम्याः, सुमद्रं दुर्यवनं निर्मक्षिकं अतिवर्षं अत्याम्रं अनुरथं अनुज्येष्ठं तद्भद्रबाहु सचक्रं। अकालेऽव्ययीभावे सहस्य सः, सब्रह्म सतृणं। ग्रन्थान्ते, सपिण्डैषणं। यथाऽथा, यथासूत्रं। यावदियत्त्वे, यावदमत्रं। दण्डादण्डि--केशाकेशि--द्विदण्ड्याद्याः। नित्यं प्रतिनाऽल्पे, शाकमल्पं शाकप्रति। पारेमध्येऽग्रेऽन्तः षष्ठ्या वा, पारे गङ्गायाः पारेगङ्गं वा। निष्प्राग्रेऽन्तःखदिरकार्श्याम्रशरेक्षुप्लक्षपीयूक्षाभ्यो वनस्य नो णः, अग्रेवणं। गिरिनदीपौर्णमास्याग्रहायण्यपञ्चमवर्ग्याद्वाऽत्।



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

मध्यम सिद्धप्रभा ॥ २३ ॥

अवर्णेवर्णस्य तद्धितेऽपदे लुक्, अन्तर्गिरं अन्तर्गिरि। शरदादेरत्, उपशरदं अन्तर्दिवं। जराया जरस् च चादत्, उपजरसं। प्रतिपरोऽनोरव्ययीभावात् अक्ष्णोऽत्, प्रत्यक्षं। संकटाभ्याम् समक्षं। अनः अत्। नोऽपदस्य तद्धिते लुक्, अध्यात्मं। संख्याक्षशलाकं परिणा द्यूतेऽन्यथावृत्तौ, एकेनान्यथा वृत्तं द्यूतमेकपरि, शलाकापरि। नपुंसकाद्वाऽनोऽत्, अनुलोमं अनुलोम। तिष्ठद्गुवत्यादयः, अन्यपदार्थेऽपि। योग्यतावीप्सानतिवृत्तिसादृश्ये, रूपस्य योग्यमनुरूपं, अर्थमर्थं प्रति प्रत्यर्थं, शक्तेरनतिक्रमेण यथाशक्ति, सशीलं। इत्यव्ययीभावः॥ गतिक्वन्यस्तत्पुरुषः, गतिसंज्ञककुशब्दौ बहुव्रीह्यादिभिन्नश्च तत्पुरुषः स्यात्, ऊरीकृत्य। दुर्निन्दाकृच्छ्रे, दुष्करं। सुः पूजायां। पूजास्वतेः प्राक् टात् न समासान्तः। अतिरतिक्रमे च, चात्पूजायां, पूजितो राजा अतिराजा। आङल्पे, ईषत्पिङ्गलः आपिङ्गलः। अव्ययं प्रवृद्धादिभिः, स्वर्याति इत्यादि। ङस्युक्तं कृता, कृति ङस्युक्तं कृता समस्यते स तत्पुरुषः, कुम्भकारः। तृतीयोक्तं वा, मूलकेनोपदंशं मूलकोपदंशं। नञ्। नञ्तत्पुरुषान्नात् । नञत्, न गौः अगौः। अन् स्वरे नञ्, अश्वादन्योऽनश्वः। त्यादौ क्षेपे, अपचति जाल्मः। पूर्वापराधरोत्तरमभिन्नेनांशिना, पूर्वः कायस्य पूर्वकायः। समेंऽशेऽर्धं नवा, अर्धपिप्पली पिप्पल्यर्धं। जरत्यादिभिः अर्धं वा, अर्धजरतीयं जरत्यर्धं। श्रितादिभिर्द्वितीयान्तं, हिताशंसुः ग्रामगतः। प्राप्तापन्नौ तयाऽच्चानयोः, द्वितीयान्तेन प्राप्तापन्नौ, प्राक् निपाते चानयोरन्त्यस्यात्, जीविकां प्राप्तः प्राप्तजीविकः जीविकाप्राप्तः। ऊनार्थपूर्वाद्यैस्तृतीयान्तं। गिरिनद्यादीनां वा णः, माषेणोनः माषोणः, मासेनावरो मासावरः। कारकं कृता, आत्मकृतं। न विंशत्यादिनैकोऽच्चान्तः, एकान्नविंशतिः, विंशत्याद्याः सदैकत्वे। चतुर्थी प्रकृत्या, यूपाय दारु यूपदारु। हितादिभिः, गोहितं। तदर्थार्थेन,

तत्पुरुषः ॥ २३ ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

पित्रे इदं पित्रर्थं, ङेऽर्थो वाच्यवत् । पंचमी भयाद्यैः, वृकाद्भयं वृकभयं अर्थापेतः । असत्त्वे ङसेर्न लुप्, अल्पान्मुक्तः । राजदन्तादिष्वप्राप्तमपि प्राक्, दन्तानां राजा राजदन्तः । षष्ठ्ययत्नाच्छेषे, यतेः कम्बलः यतिकम्बलः । कृति, सिद्धसेनकृतिः । याजकादिभिः, गुरोः पूजकः गुरुपूजकः । न कर्त्तरि षष्ठी अकेन, भवतः आसिका । कर्मजा तृचा च,-चात्कर्त्रकेन, ओदनस्य भोजकः, अपां स्रष्टा । तृतीयायां कर्त्तरि कर्मजा षष्ठी न,भाष्यस्य कृतिर्जिनभद्रगुरुणा । तृप्तार्थपूरणाव्ययातृशत्रानशा । ज्ञानेच्छार्चार्थाधारक्तेन । कालो द्विगौ च मेयैः । द्विगोरनह्नोऽट् समाहारे, द्वे अहनी सुप्तस्य द्व्यहसुप्तः,द्व्यह्नसुप्तः । सप्तमी शौण्डाद्यैः, पानशौण्डः । सिंहाद्यैः पूजायाम्, रणसिंहः । क्तेन क्षेपे । तत्पुरुषे कृति अलुप् सप्तम्या अद्व्यंजनात्, भस्मनिहुतं । प्रात्यवपरिनिरादयो गतक्रान्तक्रुष्टग्लानक्रान्ताद्यर्थाः, प्रादयो गताद्यर्थाः प्रथमाद्यन्तैः, संगतोऽर्थः समर्थः, अक्षं प्रति गतः प्रत्यक्षः । प्रत्यन्ववात् सामलोम्नोऽत् , अनुलोमः, संगतमर्थेन समर्थं । गोश्चान्ते ह्रस्वोऽनंशिसमासेयोबहुव्रीहौ ङ्यादेः, अलंकुमारिः । संख्याव्ययादङ्गुलेर्डः, अन्तरङ्गुलो नखः । संख्यातैकपुण्यवर्षादीर्घाच्च रात्रेरत्, चात् सर्वांशसंख्याव्ययाच्च, पूर्वरात्रः । राजन्सखेरट्, देवराजः । अह्नोऽट्, ग्रीष्माहः । नञव्ययात्संख्याया डः, अनवाः । कोः कत्तत्पुरुषे, कुत्सितमन्नं कदन्नं । रथवदे कद् । काऽक्षपथोः । काकवौ वोष्णे, कदुष्णं कोष्णं कवोष्णं । समानस्य धर्मादिषु सः,सधर्मः । विशेष्यं विशेषणेनैकार्थं कर्मधारयश्च चात्तत्पुरुषः, नीलं च तदुत्पलं च नीलोत्पलं, स्नातानुलिप्तः सर्वरात्रः केवलज्ञानं । सर्वादयोऽस्यादौ पुंवत् , पौर्वशालः । संख्या समाहारे द्विगुश्चानाम्न्ययं, चात् संज्ञातद्धितोत्तरपदे, पंचाम्राः सप्तर्षयः, अनाम्नि समासत्रयं । निन्द्यं कुत्सनैः, मुनिधूर्त्तः । उपमानं सामान्यैः । पुंवत्कर्मधारये परतः



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्त्र्यनूङ्, मृगचपला । उपमेयं व्याघ्राद्यैः, पुरुषव्याघ्रः । श्रेण्यादि कृताद्यैश्च्व्यर्थे, श्रेणिकृता । क्तं नञादिभिन्नैः, शाताशितं । सेट् नानिटा, पवितमपूतं । सन्महत्परमोत्कृष्टं पूजायां । किं क्षेपे, किंराजा । कुमारः श्रमणादिना, कुमारश्रमणा । मयूरव्यंसकेत्यादयः व्यंसको मयूरः मयूरव्यंसकः । महतः करघासविशिष्टे डाः स्त्रियां, महाकरः । द्वित्र्यष्टानां द्वात्रयोऽष्टाः प्राक् शतादनशीतिबहुव्रीहौ, त्रिभिरधिका त्रिंशत् त्रयस्त्रिंशत् द्वात्रिंशत् अष्टात्रिंशत् । चत्वारिंशदादौ वा । एकादश षोडश षोडत् षोढा षड्ढा । ओजोऽञ्जःसहाम्भस्तमस्तपसष्टः न लुप्, तपसाकृतं । पुंजनुषोऽनुजान्धे । आत्मनः पूरणे । मनसश्चाज्ञायिनि, आत्मनाज्ञायी । परात्मभ्यां ङेः, परस्मैपदं । मध्यान्ताद् गुरौ । नेन्सिद्धस्थे सप्तम्या न लुप्, समवर्त्ती । पश्यद्वाग्दिशो हरयुक्तिदण्डे । गवियुधेः स्थिरस्य षः, गविष्ठिरः । अंजनादीनां गिरौ दीर्घ अञ्जनागिरिः । गतिकारकस्य नहि वृतिवृषिव्यधिरुचिसहितनौ दीर्घः परीणत् । इतितत्पुरुषः कर्मधारयश्च ।



एकार्थं चानेकं च, समानाधिकरणं नामाव्ययं एकमनेकं चान्यार्थे समस्यते, स च बहुव्रीहिः, आरूढो वानरो यं स आरूढवानरः ऊढो रथो येन सः । क्ताः प्राक्, ऊढरथः, उपहृतो बलिर्यस्मै स उपहृतबलिः भीतशत्रुः चित्रगुः वीरपुरुषकः । अव्ययम्, दश समीपे येषां ते उपदशाः । परतः स्त्री स्त्र्येकार्थ्येऽनूङ् पुंवत्, पट्वीमृदुभार्यः । इनः कच् स्त्रियां, बहुदण्डिका । ऋन्नित्यदितः, बहुकर्तृकः । तद्धिताककोपान्त्यपूरण्याख्या न पुंवत्, लाक्षिकीदेश्या । रिति पुंवत्, षष्ठदेशीया । ऋदुदित्तरतमरूपकल्पब्रुवचेलड्गोत्रमतहते वा पुंवत् ह्रस्वश्च, श्रेयसितरा श्रेयस्तरा । क्यङ्मानिपित्तद्धिते, श्येतायते । प्रमाणीसंख्याड्डः । विंशतेस्तेर्डिति लुक्, उपविंशाः । उष्ट्रमुखादयः, उष्ट्रस्य मुखमिव मुखं यस्य स उष्ट्रमुखः । सहस्तेन, सह पुत्रेण । सह



आ. श्रीकैलाससागरसूरि ज्ञानमन्दिर
श्रीमहावीर जैन आराधना केन्द्र
कोबा [illegible]

P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust

सोऽन्यार्थे, सपुत्रः। दिशो रूढ्यन्तराले, पूर्वस्या उत्तरस्याश्चान्तरालं पूर्वोत्तरा। खरखुरान्नासिकाया नस्। पूर्वपदस्थान्नाम्न्यगः णः, खरणाः। अस्थूलाच्च नसः, द्रुणसः। उपसर्गात् नसः, प्रणसः।. वेः खुख्यग्रम्, विग्रः। प्रजाया अस् नञ्सुदुर्भ्यः, दुष्प्रजाः। मन्दाल्पाच्च मेधायाः, चान्नञ्सुदुर्भ्यः, सुमेधाः। द्विपदाद्धर्मादन्, सुधर्मा। संप्राज्जानोर्ज्ञुज्ञौ, संज्ञः। वोर्द्ध्वात्, उर्ध्वज्ञुः। धनुषो धन्वन्, दृढधन्वा। जायाया जानिः, प्रियजानिः। पात्पादस्याहस्त्यादेः, सिंहपात्। वयसि दन्तस्य दत् सुसंख्यात्, सुदती। दध्युरःसर्पिर्मधूपानच्छालेः कच्, प्रियशालिकः। शेषाद्वा, बहुखट्वाकः बहुखट्वः। इयसोर्न, बहुश्रेयान्। आहिताग्न्यादिषु वा क्तः प्राक्, पीतघृतः घृतपीतः। प्रहरणात्। न सप्तमीन्द्वादिभ्यश्च, चात्प्रहरणात्। विशेषणसर्वादिसंख्यं प्राक्, द्विपुत्रः। सुज्वाऽर्थे संख्या संख्येये संख्यया, द्विर्दश द्विदशाः। द्वौ वा त्रयो वा संख्या समासे क्रमेण द्वित्राः। नञ्सुव्युपत्रेश्चतुरोऽत्, त्रिचतुराः। अनोर्देश उपापः, अनूपः। दृग्दृशदृक्षे समानस्य सः, सदृक्। अन्यत्यदादेराः दृगादिषु, अन्यादृक्, इदंकिमीत्की, कीदृग्। इति बहुव्रीहिः॥

चार्थे द्वन्द्वः, समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः, नाद्ययोः समासः, चैत्रश्च मैत्रश्च दत्तश्च चैत्रमैत्रदत्ताः। त्यदादिः शेषः, स च चैत्रश्च तौ। स्त्रीपुंनपुंसकानां परं, शेषः। भ्रातृपुत्राः स्वसृदुहितृभिः समासे शिष्यन्ते, भ्राता च स्वसा च भ्रातरौ। पिता मात्रा वा, माता च पिता च पितरौ। आ द्वन्द्वे पूर्वर्तः, मातापितरौ। पुरुषः स्त्रिया, पट्वी च पटुश्च पटू। ग्राम्याशिशुद्विशफसंघे स्त्री, गावश्च गावश्च इमा गावः। धर्मार्थादिषु यथाकामं प्राक्, धर्मार्थौ अर्थधर्मौ, पंचानामजानां समाहारः पंचाजी। लघ्वक्षरासखीदुत्स्वराद्यदल्पस्वरार्च्यमेकं, लघ्वक्षरं सखिवर्जेदुदन्तं स्वराद्यकारान्तमल्पस्वरमर्च्यं



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

चैकं प्राक् । तरुतृणधान्यमृगपाक्षिणां बहुत्वे स्वैर्वैकत्वं, तिलमाषं, इदुतो यथाकामं पतिवसू वसुपती । अप्राणिपश्वादेः द्रव्यस्य जातौ वैकार्थः, अश्वशस्त्रं धवपलाशौ श्रद्धामेधे । स्पर्द्धे परमेकं प्राक् । मासवर्णभ्रात्रनुपूर्वं । चवर्गदषहः समाहारेऽत् वाक्त्वचं । स्त्रियाः पुंसो द्वन्द्वाच्चात् चात्कर्मधारये । गवाश्वादिरेकार्थः, स्त्रीपुंसं । विरोधिनामद्रव्याणां नवा स्वैः, सुखदुःखे सुखदुःखं । पशुव्यञ्जनानाम् । सेनाङ्गक्षुद्रजन्तूनाम् । फलस्य । प्राणितूर्याङ्गाणाम्, पाणिपादं शंखपटहं । नित्यवैरस्य, ब्राह्मणश्रमणम् । नदीदेशपुरां विलिङ्गानाम्, मथुरापाटलीपुत्रम् । दिवो द्यावा, द्यावागोत्रा । हृदयस्य हृल्लासलेखाण्ये, हृल्लासः । पदः पादस्याज्यातिगोपहते, पदोपहतः । हिमहातिकाषिये पद्, पत्काषी । उदकस्योदः पेषंधिवासवाहने । खित्यनव्ययारुषो मोऽन्तो ह्रस्वश्च । कर्त्तुः खश्, व्याप्यात्कर्त्तुः खश्, क्षेमंकरः । ङ्यापो बहुलं नाम्नि ह्रस्वः, महिगुप्तः । मालेषिकेष्टकस्यान्तेपि भारितूलाचिते ह्रस्वः, उत्पलमालभारि । पृषोदरादयः निरुक्तात्, पृषदुदरं यस्य स पृषोदरः । वर्णागमो वर्णविपर्ययश्च, द्वौ चापरौ वर्णविकारनाशौ । धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ॥ १ ॥ इति समासाः ॥

तद्धितोऽणादिः । प्राग्जितादण् पादत्रये । धनादेःपत्युः प्राग्जितीयेऽर्थे वाऽण्, धनपतेरपत्यादि । ङसोऽपत्ये, षष्ठ्यन्तादपत्यार्थेऽणादयः । वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते, (अवर्णेवर्णस्येति) धानपतं । दित्यदित्यादित्ययमपत्युत्तरपदाञ्ञ्यः, दितेरपत्यादि दैत्यः । कल्यग्नेरेयण्, कालेयः । उत्सादेरञ् औत्सः माहानदः माहाप्राणः जानपदः भारतः ग्रैष्मः । देवाद्यञ् च, दैवं दैव्यं । गोः स्वरे यः, गव्यं । स्त्रीपुंसान्नञ्स्नञौ, स्त्रैणं पौंस्नं । वाहनात्, हस्ती वाहनमस्येति । संयोगादिनो लुगणि, हास्तः । अत इञ् अपत्ये, ऋषभस्यापत्यं



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

आर्षभिः । बाह्वादिभ्यो गोत्रे, बाहोर्गोत्रं । अस्वयम्भुवोऽव् ओः, बाहविः आर्जुनिः सौमित्रिः सात्यकिः । शीर्षः स्वरे तद्धिते शिरसः, हास्तिशीर्षिः । व्यासवरुटसुधातृनिषादबिम्बचण्डालादिञ् अन्त्यस्य चाक् । य्वः पदान्तात्प्रागैदौत्, वैयासकिः । नडादिभ्य आयनण्, नडस्य अपत्यं नाडायनः शाकटायनः । पौत्रादि वृद्धं । वंश्यज्यायोभ्रात्रोर्जीवति प्रपौत्राद्यस्त्री युवा वृद्धं । विदादेर्वृद्धेऽञ्, विदस्य पौत्रादि वैदः काश्यपः वैष्णवः माठरः । गर्गादेर्यञ्, गार्ग्यः वात्स्यः आग्निवेश्यः औलूक्यः चौलुक्यः । शिवादेरण्, शैवः । आणि नानो लुक्, ताक्ष्णं । इतोऽनिञो द्विस्वरादेयण्, नाभेरपत्यं नाभेयः वामेयः । रेवत्यादेरिकण् वा, रैवतः रैवतिकः । भ्रातुर्व्यः, भ्रातुरपत्यं भ्रातृव्यः । ईयः स्वसुश्च, भ्रात्रीयः स्वस्रीयः । मातृपित्रादेर्डेयणीयणौ स्वसुः, मातृष्वसेयः मातृष्वस्रीयः । श्वशुराद्यः, श्वशुर्यः । षादिहन्धृतराज्ञोऽणि अनोऽस्य लुक्, औक्ष्णः । हृद्भगसिन्धोर्द्व्योर्वृद्धिः, सौहार्दं । पुनर्भूपुत्रदुहितृननान्दुरनन्तरेऽञ्, पौत्रः दौहित्रः। रागाट्टो रक्ते, कुसुम्भेन रक्तं कौसुम्भं । षष्ठ्याः समूहे, शुकानां समूहः शौकं । भिक्षादेः, भैक्षं । अनपत्येऽणि नेनो लुक्, गार्भिणं। श्वादिभ्योऽञ्, दाण्डं । ग्रामजनबन्धुगजसहायात्तल्, लिस्त्रियां,जनानां समूहो जनता । पुरुषात्कृतहितवधविकारे चेयं चात्समूहे, पुरुषेण कृतं तस्मै हितं तस्य वधो विकारः समूहो वा पौरुषेयं । विकारे अण्,मृत्तिकाया विकारो मार्त्तिकः । प्राण्योषधिवृक्षेभ्योऽवयवे च, चाद्विकारे, मार्गिकं चर्म । पयोद्रोर्यः, द्रव्यं । हेमादिभ्योऽञ्, हैमं राजतं । अभक्ष्याच्छादने वा मयट्, आश्मं अश्ममयं । गोः पुरीषे, गोमयं । पितृमातुर्व्यड्डुलं भ्रातरि, पितृव्यः मातुलः । पित्रोर्डामहट्, मातामही । तदत्रास्ति अण्, औदुम्बरो देशः । तेन निर्वृत्ते, वैश्रमणी । नद्यां मतुः निर्वृत्ते, जाह्नवीसरयूमान् । मध्वादेः,



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

मधुमान् । मावर्णान्तोपान्त्यापंचमवर्गान्मतोर्मो वः, शरावती शमीवान् । नडकुमुदवेतसमहिषाड्डित् तद्वति देशे, महिष्मान् । नडशादाड्डूलः । बलादेर्यः, बल्यं मूल्यं कुल्यं वन्यं । उदितगुरोर्भाद्युक्तेऽब्दे । पुष्पतिष्ययर्याभाणि यलुक्, पौषं वर्षं । चन्द्रयुक्तात्काले, पौषी । साऽस्य पौर्णमासी, पौषः । देवता साऽस्य, अर्हन्देवताऽस्यार्हतः जैनः । द्यावापृथिवीशुनासीराग्निषोममरुद्वद्वास्तोष्पतिगृहमेधादीययौ, शुनासीरीयम् शुनासीर्यम् । वाय्वृतुपित्रुषसो यः । तद्वेत्त्यधीते, निरुक्तं वेत्त्यधीते वेति नैरुक्तः । न्यायादेरिकण्, नैयायिकः पौराणिकः प्राथमिकः । पदकल्पलक्षणान्तक्रत्वाख्यानाख्यायिकात्, पौर्वपदिकः मातृकाल्पिकः सौलक्षणिकः राजसूयिकः प्रैयंगुकः । ऋवर्णोवर्णदोसिसुसुशश्वदकस्मात्त इकस्येतो लुक्, वासवदत्तिकः । प्रोक्तात्, सुधर्मणा प्रोक्तं सौधर्मं द्वादशांगम् । शेषे संस्कृतमक्ष्यान्नादन्यस्मिन् । दूरादेत्यः । उत्तरादाहञ् । पारावारादीनः । द्युप्रागपागुदचो यः, दिव्यं उदीच्यः । ग्रामादीनञ् च । दक्षिणापश्चात्पुरसस्त्यण्, पौरस्त्यः । वहिषष्टीकण् च । प्रायोऽव्ययस्यापदान्त्यस्वरादेर्लुक्, वाहीकः बाह्य : । क्वेहामात्रतसस्त्यच् , कुतस्त्यः कुत्रत्यः । भवतोरिकणीयसौ, भावत्कः भवदीयः । परजनराज्ञोऽकीयः, राजकीयः । वा युष्मदस्मदोऽञीनञौ युष्माकास्माकौ चास्यैकत्वे तु तवकममकं, यौष्माकः आस्माकीनः तावकीनः मामकः । पश्चादाद्यन्ताग्रादिमः, पश्चिमः आदिमः । मध्यान्मः । अध्यात्मादिभ्य इकण् । वर्षाकालेभ्यः, वार्षिकः मासिकः । श्वसस्तादिः, शौवस्तिकः । द्वारादेः, दौवारिकः । चिरपरुत्परारेस्त्नः । पुरोऽनः । पूर्वाह्णापराह्णात्तनट् वा । सायंचिरंप्राह्णेप्रगेऽव्ययात् । तत्र कृतलब्धक्रीतसंभूतेऽणेयणादयः, मधुरायां कृतं लब्धमित्यादि माथुरं । कुशले माथुरः । पथोऽकः, पथकः । भवे, माथुरः । दिगादिदेहांशाद्यः, दिश्यः



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मूर्धन्यः मेध्यं न्याय्यं रहस्यं आद्यं अन्त्यं। तत आगते,माथुरः दैत्यः ग्रामीणः नादेयः। पितुर्यो वा, पैतृकं पित्र्यं। तस्येदं, भानोरियं भानवीया,ईयणादयः। शिलालिपाराशर्यान्नटाभिक्षुसूत्रे णिन्, शैलालिनो नटाः। उपज्ञाते, सिद्धेनोपज्ञाता सैद्धीया। कृते, क्षमाश्रमणेन कृतं क्षमाश्रमणीयं। कुलालादेरकञ्, कौलालकः। सेर्निवासादस्य, प्रथमान्तनिवासादस्येत्यर्थे इयादयः, राष्ट्रियः। तेन जितजयद्दीव्यत्खनत्सु इकण्, भरतेन जितं जयन्दीव्यन्खनँश्च भारतिकः। संस्कृते संसृष्टे तरति चरति। वेतनादेर्जीवति, वैतनिकः जालिकः। आयुधादीयश्च, प्राहरणिकः प्राहरणीयः। ओजःसहोऽम्भसो वर्त्तते, ओजसा वर्त्तते औजसिकः। पक्षिमत्स्यमृगार्थाद् घ्नति, मत्स्यान् हन्ति मात्सिकः। परदारादिभ्यो गच्छति, पारदारिकः। धर्माधर्माच्चरति, धर्ममाचरति धार्मिकः। तदस्य पण्यं, गन्धोऽस्य पण्यं गान्धिकः। शिल्पं, तान्तुवायिकः। शीलं, पारुषिकः। प्रहरणं, आसिकः। भक्ष्यं। हितमस्मै, लौकिकं। संशयं प्राप्ते ज्ञेये। तस्मै योगादेः शक्ते, योगाय शक्तो यौगिकः। तेषु देये कल्पे कार्ये च भववत्, मासे देयं कल्पं कार्यं च मासिकं। शोभमाने तेन, शैखरिकः। कालात्परिजय्यलभ्यकार्यसुकरे, वार्षिकः। निर्वृत्ते, आह्निकं। कालः। सोऽस्य ब्रह्मचर्यतद्वतोः। प्रयोजनं, जिनमहः प्रयोजनमस्य जैनमहिकं। त्रिंशद्विंशतेर्डकोऽसंज्ञायामार्हदर्थे,विंशतिमर्हति। विंशतेस्तेर्डिति लुक्, विंशकः संख्याडतेश्चाशात्तिष्टेः क आर्हदर्थे क्रीतादौ, द्विकं। डत्यतु संख्यावत्, यावत्कं। मूल्यैः क्रीते, यत् शतेन क्रीतं शत्यं। वंशादेर्भाराद्धरद्वहदावहत्सु, वांशिकः। सोऽस्य भृतिवस्नांशम् केकं, पंचकः साहस्रिकः। मानं, द्रौणिकः। स्तोमे डट्, विंशतेः स्तोमो विंशः। तमर्हति, वैषिकः। दण्डादेर्यः दण्ड्यः। वहति रथयुगप्रासंगाद्यः, युग्यं। धुरो येयण्।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

न यि ताद्धिते दीर्घः, धुर्यः धौरेयः। अश्वैकादेः चादीनः, एकधुरीणः एकधुरः। धनगणाल्लब्धरि, धनं लब्धा धन्यः। हृद्यपद्यतुल्यमूल्यवश्यपथ्यवयस्यधेनुष्यगार्हपत्यजन्य-धर्म्यं यथास्वार्थे। न्यायार्थादनपेते। तत्र साधौ, शरणे साधुः शरण्यः। पथ्यतिथिस्वपतेरेयण्, स्वापतेयं। पर्षदो ण्यणौ। सर्वजनाण्ण्येनञौ। कथादेरिकण्, कथायां साधुः काथिकः सांग्रामिकः। ण्योऽतिथेस्तदर्थे, अतिथये इदं आतिथ्यं। पाद्यार्घ्ये। हविरन्नभेदापूपादेर्यो वेदमाद्यर्थे, तण्डुल्यं ताण्डुलिकः। उवर्ण-युगादेर्यः। तस्मै हितं। भोगोत्तरपदात्मभ्यामीनः। क्षुभ्नादीनां न णः, आचार्यभोगीनः। ईनेऽध्वात्मनोर्न नादिलुक्, आत्मनीनः। पंचसर्वविश्वाज्जनात्कर्मधारये, सार्व-जनीनः। महत्सर्वादिकण् माहाजनिकः। सर्वाण्णो वा, सार्वः। भावे त्वतल्, शब्दप्रवृत्तिनिमित्तं भावः। त्वते ङ्यापो बहुलं ह्रस्वः, अजत्वं। पृथ्वादेरिमन् वा। पृथुमृदुभृशकृश-

दृढपरिवृढस्य ऋतो र इमनि णीष्ठेयस्सु च। त्र्यन्त्यस्वरादे-र्लुक् इमनादौ, पृथुता पृथुत्वं प्रथिमा पार्थवं। भूर्लुक् चेव-र्णस्य चादूत् बहोः, भूमा। प्रियस्थिरस्फिरोरुगुरुबहुतृप्रदी-र्घवृद्धवृन्दारकस्येमनि च प्रास्थास्फावरगरबंहत्रपद्राघव-र्षवृन्दं, चाण्णीष्ठेयसौ, प्रेमा वृन्दिमा। स्थूलदूरयुवह्रस्वक्षि-प्रक्षुद्रस्यान्तःस्थादेर्लुक् गुणश्च नामिनः इमनादौ, स्थविमा दविमा ह्रसिमा क्षोदिमा। वर्णदृढादिभ्यष्ट्यण् च वा, शौक्ल्यं। पतिराजान्तगुणांगराजादिभ्यः कर्मणि भावे च, राजन्यं आधिपत्यं। अर्हतस्तोन्त् च, आर्हन्त्यं। स्तेनान्नलुक्, स्तेयं स्तैन्यं। प्राणिजातिवयोर्थादञ्। युवादेरण्, यौवनं स्थाविरं सौष्ठवं मैथुनं। य्वृवर्णाल्लघ्वादेः भावे कर्मण्यण्त्वतलः, शौचं। चौरादेः, चौर्यं युवता मेधावित्वं। शाकटशाकिनौ क्षेत्रे। धान्येभ्य ईनञ्। वोमाभंगातिलाद्यः, तिल्यं। अलाब्वाश्च कटो रजसि, चादुमादेः। कर्णादेर्मूले जाहः। पक्षात्तिः।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हिमादेलुः सहे। बलवातादूलः। शीतोष्णतृप्रादालुरसहे। शाखादेर्यस्तुल्ये, शाख्यं जघन्यं अग्र्यं। द्रोर्भव्ये। काकतालीयादयः, काकतालीयः खलतिबिल्वीयं अन्धवर्त्तिकं अर्धजरतीयं अजाकृपाणीयं घुणाक्षरीयं। वेर्विस्तृते शालशंकटौ। संप्रोन्नेः संकीर्णप्रकाशाधिकसमीपे कटः। अवेः संघातविस्तारे कटपटं। तदस्य संजातं, दुःखं जातमस्य दुःखितः, तारकमूत्रविचारप्रचारनिद्राश्रद्धाद्रोहव्याधिरोमाश्चहर्षगर्वकलंकरागक्षुधृतृष्मुद्राफलतिलकात्। प्रमाणान्मात्रट्,हस्तः प्रमाणमस्य हस्तमात्रं। हस्तिपुरुषाद्वाऽण्। वोर्ध्वं दघ्नट्द्वयसट्। इदंकिमोऽतुरिय् किय् चास्य, इयान् कियान्। यत्तदेतदो डावादिः, यावान्। यत्तत्किमः संख्याया डतिः, या संख्याऽस्य यति। अवयवात्तयट्, चत्वारोऽवयवा अस्य चतुष्टयं। द्वित्रिभ्यामयट् वा, द्वयं त्रयं। संख्यापूरणे डट्, एकादशः। विंशत्यादेर्वा तमट्। नो मट्, पंच संख्यापूरकोऽस्मिन्निति पंचमः। षट्कतिकतिपयात्थट्। चतुरः, चतुर्थः। येयौ चलुक् च, तुर्यः तुरीयः। द्वेस्तीयः, द्वितीयः। त्रेस्तृ च, तृतीयः। पूर्वमनेन सादेश्चेन्, पूर्वं कृतः पूर्वी कृतपूर्वी वा। इष्टादेः। तेन वित्ते चंचुचणौ, न्यायचणः। साक्षाद्द्रष्टा साक्षी साक्षिणौ। तदस्यास्त्यस्मिन्निति मतुः, गुणाः सन्ति अस्यास्मिन्वेति गुणवान् मावर्णान्तोपान्त्यापंचमवर्ग्यान्मतोर्मो वः। भूमनिन्दाप्रशंसासु, नित्ययोगेऽतिशायने। संसर्गेऽस्तिविवक्षायां, प्रायो मत्वादयो मताः ॥१॥ न स्तं मत्वर्थे नाम पदं, शर्मवान्। नोम्यादिभ्यो मतोर्मो वः, भूमिमान् द्राक्षामान् ककुद्मान् ज्योतिष्मान् कान्तिमान् वसुमान् भानुमान्। शिखादिभ्य इन्,माली कर्मी बली शृंगी फली मनीषी करुणी उद्यमी। अतोऽनेकस्वरात्, तिलकी। तुन्दादिभ्य इलश्च। वृन्दादारकः। शृंगात्। फलबर्हाच्चेनः। मलादीमसश्च, मलिनः मलीमसः। बलवातदन्त-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ललाटादूलः, बलूलः । प्राण्यंगादातो लः, जंघालः । प्रज्ञापर्णोदकफेनाल्लेलौ । वाच आलाटौ, वाचालः । ग्मिन्, वाग्ग्मी । मध्वादिभ्यो रः, मधुरः खमुखकुंजनगोपशुषिपाण्डुपांशवः । सिध्मादिक्षुद्रजन्तुरुग्भ्यो लः, मूर्छालः यूकालः, मांसपत्रस्नेहशीतश्यामपिंगपक्ष्मन्मृदुपृथुमंजुवत्सांसाः । प्रज्ञाश्रद्धार्चावृत्तेर्णः, प्राज्ञः । द्युद्रोर्मः । कृपाहृदयादालुः । अभ्रादिभ्यः अः, अभ्रः अर्शस् उरस् । अस्तपोमायामेधास्रजो विन्, तपस्वी स्रग्वी । आमयाद्दीर्घश्च, आमयावी । वातातिसारपिशाचादिन् कश्चान्तस्य । धर्मशीलवर्णान्तात्, मुनिधर्मी । प्रकारे जातीयर्, पटप्रकारः पटजातीयः । कोऽण्वादेः, अणुकः स्थूलकः । भूतपूर्वे पूचरट्, पूर्वं दृष्टो दृष्टचरः । षष्ठ्या रूप्यप्चरट् । प्रायोऽतोर्द्वयसट्मात्रट्, यावन्मात्रं । वर्णाव्ययात्स्वरूपे कारः, चकारः । नामरूपभागाद्धेयः । नवादीनतनत्नं नूश्चास्य, नवीनं नूतनं नूत्नं । विनयादिभ्य इकण्, विनय एव वैनयिकं, समयसमायकथंचित्अकस्मात्उपचारव्यवहारविशेषाः । मृदास्तिकः । सस्नौ प्रशस्ते । प्रकृते मयट्, यवागूः प्रधाना प्रचुरा वा यवागूमयं । अस्मिन्, अपूपा अस्मिन्नपूपमयं । निन्द्ये पाशप्, भिषक्पाशः । त्यादेश्च प्रशस्ते रूपम्, चात् गुणांगात्, आगमरूपः । प्रकृष्टे तमप्, प्रकृष्टः श्रेष्ठः श्रेष्ठतमः । द्वयोर्विभज्ये तरप् प्रकृष्टे, दन्तोष्ठस्य दन्ताः स्निग्धतराः । किन्त्याद्येऽव्ययादसत्त्वे तयोरन्तस्याम्, किन्तराम् पचतितराम् पूर्वाह्णेतराम् । गुणांगाद्वेष्ठेयसू तरप्तमपोः, पटिष्ठः पटुतमः पटीयान् पटुतरः । विन्मतोर्णीष्ठेयसौ लुप् । अल्पयुनोः कन्वा, कनिष्ठः । प्रशस्यस्य श्रः, श्रेष्ठः । वृद्धस्य च ज्यः, ज्यायान् । बाढान्तिकयोः साधनेदौ । बहोर्णीष्ठे भूय्, भूयिष्ठः भूयान् । अतमबादेरीषदसमाप्ते कल्पप्देश्यप्देशीयरः, ईषदूनो गुडो गुडकल्पा द्राक्षा । नाम्नः प्राग् बहुर्वा, बहुगुडा । एकादाकिन् चासहाये



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

चात्कः, एककः एकाकी । कुत्सितात्पाज्ञाते कप्, अश्वकः । त्यादिसर्वादेः स्वरेष्वन्त्यात्पूर्वोऽक्, सर्वके । वत्सोक्षाश्वर्षभाद् ह्रासे पित्तरट् । वैकाद् द्वयोर्निर्धार्ये डतरः। यत्तत्किमन्यात्, कतरः । असकृत् संभ्रमे पदं वाक्यं वा, हस्त्यागच्छति २ । सामीप्येऽधोध्युपरि वीप्सायां, गृहे गृहे धार्मिकाः ॥ इति तद्धितप्रत्ययाः ॥

## अथाख्यातप्रकरणम्

क्रियार्थो धातुः, आयाद्यन्ता अपि धातवः । न प्रादिरप्रत्ययः, यस्मात्प्रादेर्न प्रत्ययः स न धातोरवयवः स्यात्, ततोऽडादिः परः । सति वर्त्तमाना स्यात् । वर्त्तमाना तिव् तस् अन्ति सिव् थस् थ मिव् वस् मस् । ते आते अन्ते से आथे ध्वे ए वहे महे, एषामष्टादशानां वर्त्तमानासंज्ञा धातोश्च सा । नवाद्यानि शतृक्वसू च परस्मैपदं, सर्वासु आख्यातविभक्तिषु आद्यानि नव वचनानि शतृक्वसू च कृदन्तौ परस्मैपदाख्यानि स्युः । इङितः धातोः कर्त्तरि आत्मनेपदम् । ईगितो धातोरुभयं, फलवति तु कर्त्तर्यात्मनेपदं । शेषात्परस्मै । त्रीणि त्रीण्यन्ययुष्मदस्मद्युपपदे स्युः । भू सत्तायाम् । कर्त्तर्यनद्भ्यः शव् शिति । एताः शितः, वर्त्तमानासप्तमीपञ्चमीह्यस्तन्याख्या विभक्तयः शितः । नामिनो गुणोऽक्ङिति । शिदवित् ङित्, विद्वर्जः शित् प्रत्ययो ङित् भवति, तसि शव्निमित्तो गुणः, भवतः (लुगस्येति) भवन्ति, भवसि भवथः भवथ । मव्यस्याः, अकारस्याकारो मवोः, भवामि भवावः भवामः । योगे परः, स च त्वं च भवथः, स च त्वं च अहं च भवामः । विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थने सप्तमीपञ्चम्यौ । सप्तमी यात् याताम् युस् यास् यातम् यात याम् याव याम । ईत ईयाताम् ईरन्



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

ईथास् ईयाथाम् ईध्वम् ईय ईवहि ईमहि, एतानि सप्तमी । शेषविभागः पूर्ववत् । यः सप्तम्याः अत इः, भवेत् भवेताम् । याम्युसोरियमियुसौ अतः, भवेयुः भवेः भवेतम् भवेत भवेयम् भवेव भवेम, साधुर्मोक्षोद्यतो भवेत् । आशिष्याशीःपञ्चम्यौ विभक्ती स्याताम् । पञ्चमी तुव् ताम् अन्तु हि तम् त आनिव् आवव् आमव् । ताम् आताम् अन्ताम् थास् आथाम् ध्वम् ऐव् आवहैव् आमहैव्, एतानि पञ्चमीसंज्ञानि । भवतु । आशिषि तुह्योस्तातङ् वा, भवतात् भवताम् भवन्तु । अतः प्रत्ययाकाराद्धेर्लुक्, भव भवतात् भवतम् भवत भवानि भवाव भवाम, आयुष्मान् भवतु भवताद्वा भवान् । अनद्यतने ह्यस्तनी, उभयतः सार्धरात्रमहोऽद्यतनस्तं वर्जयित्वा शेषे भूते ह्यस्तनी । ह्यस्तनी दिव् ताम् अन् सिव् तम् त अमिव् व म । त आताम् अन्त थास् आथाम् ध्वम् इ वहि महि । अड् धातोरादिर्ह्यस्तन्यां चामाङा, माङ्वर्जस्य धातोरादिरड् ह्यस्तनीक्रियातिपत्त्यद्यतनीषु, अभवत् अभवताम् अभवन् अभवः अभवतम् अभवत अभवम् अभवाव अभवाम, ह्योऽभवद्वीरमहिमा । अद्यतनी भूते । अद्यतनी दि ताम् अन् सि तम् त अम् व म । त आताम् अन्त थास् आथाम् ध्वम् इ वहि महि, एषाऽद्यतन्याख्या । सिजद्यतन्यां धातोः । स्ताद्यशितोऽत्रोणादेरिट्, त्रोणादिवर्जस्तादेरशित इट् । पिबैतिदाभूस्थः सिचो लुप् परस्मै न चेट् । अवौ दाधौ दा, अवितौ दाधौ दासंज्ञौ भवतः, सिज्लुपि न गुणः, अभूत् अभूताम् । भुवो वः परोक्षाद्यतन्योः, वकारान्तभुव उपान्त्यस्योत ऊत् परोक्षाद्यतन्योः स्वरे, अभूवन् अभूः अभूतम् अभूत अभूवम् अभूव अभूम, अभूवन्निन्द्रा वीरजन्मोत्सवोत्सुकाः । परोक्षे परोक्षा । परोक्षा णव् अतुस् उस् थव् अथुस् अ णव् व म । ए आते इरे से आथे ध्वे ए वहे महे । द्विर्धातुः परोक्षाङे प्राक्तु स्वरे स्वरविधेः ।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भूस्वपोरदुतौ, भुवः पूर्वस्यात् स्वप उः। द्वितीयतुर्ययोः पूर्वौ प्रथमतृतीयौ पूर्वस्य, बभूव बभूवतुः बभूवुः। स्कृऽसृवृ-भृस्तुद्रुश्रुस्रोर्व्यञ्जनादेः, स्रादिवर्जस्य स्कुश्च परोक्षाया व्यञ्जनादेरिट्, बभूविथ बभूवथुः बभूव बभूव बभूविव बभूविम, बभूव भरतो योगी। आशीः क्यात् क्यास्ताम् क्यासुस् क्यास् क्यास्तम् क्यास्त क्यासम् क्यास्व क्यास्म। सीष्ट सीयास्ताम् सीरन् सीष्ठास् सीयास्थाम् सीध्वम् सीय सीवहि सीमहि, एतान्याशीः। भूयात् भूयास्ताम् भूयासुः भूयाः भूयास्तम् भूयास्त भूयासम् भूयास्व भूयास्म, भूयासम् सर्वभावविद्। अनद्यतने श्वस्तनी वर्त्स्यति। श्वस्तनी ता तारौ तारस् तासि तास्थस् तास्थ तास्मि तास्वस् तास्मस्। ता तारौ तारस् तासे तासाथे ताध्वे ताहे तास्वहे तास्महे। भविता भवितारौ भवितारः भवितासि भवि-तास्थः भवितास्थ भवितास्मि भवितास्वः भवितास्मः, भविता श्वो

महोत्सवः। भविष्यन्ती वर्त्स्यति। भविष्यन्ती स्यति स्यतस् स्यन्ति स्यसि स्यथस् स्यथ स्यामि स्यावस् स्या-मस्। स्यते स्येते स्यन्ते स्यसे स्येथे स्यध्वे स्ये स्यावहे स्यामहे। भविष्यति भविष्यतः भविष्यन्ति भविष्यसि भवि-ष्यथः भविष्यथ भविष्यामि भविष्यावः भविष्यामः, मुक्तिभाजो भविष्यामस्तत्र कांक्षा यतोऽनघा। सप्तम्यर्थे क्रियातिपत्तौ क्रियातिपत्तिः, एष्यति हेतुफलभावयोरतिपत्तौ क्रियातिपत्तिः। भूतेऽपि क्रियातिपत्तिश्चेत्। क्रियातिपत्तिः स्यत् स्यताम् स्यन् स्यस् स्यतम् स्यत स्यम् स्याव स्याम। स्यत स्ये-ताम् स्यन्त स्यथास् स्येथाम् स्यध्वम् स्ये स्यावहि स्या-महि। अभविष्यत् अभविष्यताम् अभविष्यन् अभविष्यः अभ-विष्यतम् अभविष्यत अभविष्यम् अभविष्याव अभविष्याम, उपाध्यायोऽभविष्यद्वाचनाऽभविष्यत्। अदुरुपसर्गान्तरो णहि-नुमीनानेः, दुर्वर्जोपसर्गान्तरशब्दरषुर्णकारादिहिनुमीनानीनां



P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust

नो णः, अन्तर्भवाणि । अकखाद्यषान्ते पाठे वा नेर्नो णः, प्रणिभवति प्रनिभवति । पा पाने । श्रौतिकृवुधिवुपाघ्राध्मास्थाम्नादाम्दृश्यर्तिशदसदः गृकृधिपिबजिघ्रधमातिष्ठमनयच्छपश्यर्च्छशीयसीदं शिति, पिबति पिबेत् पिबतु अपिबत् । एकस्वरादनुस्वारेतः स्ताद्यशितो नेट् । एते चेमे-

श्विश्रिडीशीयुरुक्ष्णुक्षुणुस्नुभ्यश्च वृगो वृङः । ऊदृदन्ता युजादिभ्यः,स्वरान्ता धातवोऽपरे ॥ १ ॥ पाठ एकस्वराः स्युर्येऽनुस्वारेत इमे स्मृताः । द्विविधोऽपि शकिश्चैव, वचिर्वीचिरिची पचिः॥२॥सिञ्चतिर्मुचिरतोऽपि पृच्छति,भ्रस्जिमस्जिभुजयो युजिर्यजिः।ष्वञ्जिरञ्जिरुजयो निजिर्विजृः,सञ्जिभञ्जिभजयः सृजित्यजी ॥३॥ स्कन्दिविद्यविद्लृविन्तयो नुदिः, स्विद्यतिः शदिसदी भिदिच्छिदी । तुद्यती पदिहदी स्विदिक्षुदी, राधिसाधिशुधयो युधिव्यधी ॥४॥ बन्धिबुध्यरुधयः क्रुधिक्षुधी, सिद्ध्यतिस्तदनु हन्तिमन्यती । आपिना तपिशपिक्षिपिच्छुपो, लुम्पतिः सृपिलिपी वपिस्वपी॥५॥ यभिरभियमिरमिनमितमिगमयः, कुशिरिशिरुशिलिशिदिशतिदशतयः। स्पृशिमृषतिविशतिदशिशिष्लृशुपयस्त्विषिपिषिविष्लृकृषितुषिदुषिपुषयः ॥६॥ श्लिष्यतिर्द्विषिरतो घसिवसती, रोहतिर्लुहिरिही अनिड्गदितौ । देग्धिदोग्धिलिहयो मिहिवहती, नह्यतिर्दहिरिति स्फुटमनिटः ॥७॥ अपात् । स्रिज्विदोऽभुवोऽनः पुस् । इडेत्पुसि चातो लुक् चात्क्ङिति स्वरेऽशिति, अपुः । ह्रस्वः पूर्वस्य। आतो णव औः, पपौ । इन्ध्यसंयोगात्परोक्षा किद्वत्, पपतुः पपुः । सृजिदृशिस्कृस्वरात्वतस्तृज्नित्यानिटस्थव आदिरिट् वा, पपिथ पपाथ पपिव पपिम । गापास्थासादामाहाकः क्रित्याशिष्ये:, पेयात् पाता अपास्यत् । घ्रा गन्धोपादाने, जिघ्रति अजिघ्रत् । ट्धेघ्राशाच्छासो वा सिचो लुप् परस्मै न चेट्, अघ्रात् । यमिरमिनम्यातः सोऽन्तश्च परस्मै चात्सिच आदिरिट् । इट ईति सिचो लुक् । सः सिजस्तेर्दिस्योः परादिरीत्,अघ्रासीत् । व्यञ्जनस्यानादेः लुक् । गहोर्जः पूर्वस्य,



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

जघ्रौ जघ्रिथ जघ्राथ। संयोगादेर्वाऽऽशिष्येरातः, घ्रेयात् घ्रायात् घ्राता। ध्मा शब्दाग्निसंयोगयोः, धमति अधमत् अध्मासीत् अध्मासिष्टाम् अध्मासिषुः अध्मासीः अध्मासिष्टं अध्मासिष्ट अध्मासिषं अध्मासिष्व अध्मासिष्म, दध्मौ ध्मेयात् ध्मायात् ध्माता ध्मास्यति। ष्ठा गतिनिवृत्तौ, तिष्ठति तिष्ठतु। षः सोऽष्ट्यैष्ठिवष्वष्कः पाठे धात्वादेः,अस्थात्। अघोषे शिटो लुक् पूर्वस्य, तस्थौ स्थेयात् स्थाता। स्थासेनिसेधसिचसञ्जां द्वित्वेऽपि नाम्यादेः षः, अपिनाऽट्यपि, प्रत्यष्ठात्। उदः स्थास्तम्भः सलुक्, उत्तिष्ठति। म्ना अभ्यासे, मनेत् अम्नासिषम् मम्निव म्नेयात् म्नायात् अम्नास्यत्। दाम् दाने, यच्छति अदात् देयात्। नेर्ङ्मादापतपदनदगदवपिवहिशमूचिग्र्यातिद्रातिप्सातिस्यातिहन्तिदेग्धौ अदुरुपसर्गान्तरो रषुर्नेर्नो णः, प्रणियच्छति, अधर्म्यसंप्रदाने आत्मनेपदं, दास्या संप्रयच्छते। जि ज्रि अभिभवे,जयति। सिचि परस्मै समानस्याङिति वृद्धिः, अजैषीत् अजैषुः अजैषीः। जेर्गिः सन्परोक्षयोः। नामिनोऽकलिहलेर्वृद्धिर्ञ्णिति, जिगाय (योऽनेकस्वरेति) जिग्यतुः जिगयिथ जिगेथ। णिद्वाऽन्त्यो णव्, जिगाय जिगय जिग्यिव। दीर्घश्च्वियङ्यक्क्येषु च, चात् अशिषियि, जीयात् जेष्यति। क्षि क्षये, क्षयतु अक्षैषीः। कङश्चञ् पूर्वस्य, चिक्षाय। इदुद्रुशुस्रु गतौ, अयति। स्वरादेस्तासु अद्यतन्यादिषु वृद्धिः, आयत्। पूर्वस्यास्वे स्वरे इयुव् य्वोः, इयाय ईयतुः इययिथ इयेथ एष्यति। णिश्रिद्रुस्रुकमः कर्त्तरि ङः अद्यतन्याम्, अदुद्रुवत् दुद्रोथ, असुस्रुवत्। स्मृ चिन्तायां, स्मरतु अस्मार्षीत्। संयोगादृदर्त्तेः परोक्षायां गुणः, सस्मरतुः। ऋतः तृज्नित्यानिटस्थव इण्न, सस्मर्थ। क्ययङाशीर्ये संयोगादृदर्त्तेर्गुणः, स्मर्यात्। हन्नृतः स्यस्येडादिः, स्मरिष्यति। सृ गतौ। वेगे सर्त्तेर्धाव् अत्यादौ शिति, धावति। सर्त्यर्त्तेर्वाऽद्यतन्यामङ्। ऋवर्णदृशोऽङि गुणः, असरत् ससर्थ। रिः



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

शक्याशीर्ये ऋतः, स्रियात् । ऋ प्रापणे च, ऋच्छति आर्च्छत् आरत् आर्षीत् आर्षुः । ऋतोऽत् पूर्वस्य, आर आरतुः । ऋवृव्येऽदः थव इट्, आरिथ । तॄ प्लवनतरणयोः, तरति अतारीत् । स्कृच्छृतोऽकि परोक्षायां गुणः । तॄत्रपफलभजाम् अत एर्न च द्विरवित्परोक्षासेट्थवोः, तेरतुः । ऋतां क्ङितीर, तीर्यात् । वृतो नवाऽनाशीःसिच् परस्मै च, वृत इटो वा दीर्घः, आशीः परस्मैसिचः परोक्षायाश्च न, तरीता तरिता । ट्धे पाने, धयति । आत्सन्ध्यक्षरस्य । न शिति, अधासीत् अधात् । ट्धेश्वेर्वा ङोऽद्यतन्यां, अदधत् दधौ । ध्यै चिन्तायां, ध्यायति अध्यासीत् दध्यौ ध्यायात् ध्येयात् । ग्लै ग्लानौ । म्लै म्लानौ । कै गै रै शब्दे । ष्ट्यै स्त्यै संघाते च, ष्ट्यायति अष्ट्यासीत् टष्ट्यौ ष्ट्येयात् ष्ट्यायात् । तक हसने, तकति । व्यंजनादेर्वोपान्त्यस्यातो वृद्धिः सिचि परस्मै, अताकीत् अतकीत् । ञ्णिति उपान्त्यस्यातो वृद्धिः, तताक । अनादेशादेरेकव्यञ्जनमध्येऽत एरवित्परोक्षासेट्थवोः, तेकतुः तेकिथ । तकु कृच्छ्रजीवने । उदितः स्वरान्नोऽन्तः, तङ्कति अतङ्कीत् ततङ्क तङ्क्यात् । उखृ शोषणालमर्थयोः । लघोरुपान्त्यस्य गुणोऽक्ङिति, ओखति औखीत् उवोख ऊखतुः । त्वगु गतिकम्पनयोः । लघु शोषणे । शुच शोके । क्रुञ्च गतौ, चुक्रुञ्चतुः क्रुच्यात् । लुञ्च अपनयने । अर्च पूजायां । अञ्चू गतौ च, अञ्चति आञ्चत् । अनातो नश्चान्त ऋदाद्यशौसंयोगान्तस्यातः परोक्षायां, आङ्किन्नात्, चादादेरस्याः, आनञ्च अञ्च्यात्, गतौ अच्यात् । म्रुचू म्लुचू गतौ । ऋदिच्छ्विस्तम्भूम्रुचूम्लुचू ग्रुचूग्लुचूञ्जो वाऽद्यतन्यां परस्मै अङ्, अम्रुचत् अम्रोचीत् अम्लुचत् अम्लोचीत् । ग्रुचू ग्लुचू स्तेये, अग्रुचत् अग्रोचीत् अग्लुचत् अग्लोचीत् । वाछु इच्छायाम् । मूर्छा मोहसमुच्छ्राययोः । वज व्रज गतौ । न शसददिवादिगुणिनोऽत एः, ववजतुः । वदव्रजलः सेटि सिचि वृद्धिः, अव्राजीत् । अज क्षेपणे च, अजति आजत् ।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अघञ्क्यबलच्यजेर्वी अशिति, विवाय विव्युः विवयिथ विवेथ। अयि व्यंजने वीर्वाऽशिति, आजिथ वीयात्। एजृ कम्पने। अर्ज सर्ज अर्जने। तर्ज भर्त्सने। तुज हिंसायां। त्यज हानौ, त्यजति। **व्यञ्जनानामनिटि सिचि वृद्धिः ।** **षढोः कस्सि परेऽसन्**, अत्याक्षीत् । **धुड्ह्रस्वाल्लुगनिटः सिचः तथोः**, अत्याक्ताम् अत्याक्षुः अत्याक्ष्म। षञ्ज सङ्गे। **दंशसञ्जः शवि नलुक्**, सजति । कटे वर्षावरणयोः। **न श्विजागृशसक्षणह्म्येदितः** सेटि सिचि वृद्धिः,अकटीत्। णट नृत्तौ। **पाठे धात्वादेर्णो नः**, नटति। पठ व्यक्तायां वाचि, अपाठीत् अपठीत् पठ्यात्। शठ हिंसासंक्लेशकैतवेषु। कुठु लुठु गतिप्रतिघातालस्ययोः, कुण्ठति अलुण्ठीत्। मडु भूषायाम्। क्रीडृ विहारे। विड आक्रोशे, वेडिता। अण वण रण भण धण क्वण चण शब्दे। ओणृ अपनयने। **गुरुनाम्यादेरनृच्छुर्णोः परोक्षाया आम्**, **कृभ्वस्तयश्च तदन्ता अनु**, ओणांचकार। चितै संज्ञाने, चिचेत अचेतिष्यत्। अत सातत्यगमने, आतीत् आत आतिथ। च्युतृ आसेचने, अच्युतत् अच्योतीत्। कित निवासे। **कितः संशयप्रतीकारे सन्।** **सन्यङश्चैकस्वरोऽशो द्विः।** **स्वार्थे सनो नेट्**, चिकित्सति। ऋत घृणार्तिस्पर्धेषु। **ऋतेर्ङीयः।** **पराणि कानानशौ चात्मने त्याद्यासु सर्वासु**, ऋतीयते। **आतामाते आथामाथे आदिरात्**, ऋतीयेथे आर्तीयत। **अशवि वा आयणिङ्डीयाः**, आर्त्तीयिष्ट। **नाम्यन्तात्परोक्षाद्यतन्याशिषो धो ढः।** **हान्तस्थाञ्जीड्भ्याम् वा**, आर्त्तीयिढ्वम् आर्त्तीयिध्वम्। **आमः कृगः प्रागवदात्मने**, ऋतीयांचक्रे आनर्त। मथु मन्थ हिंसासंक्लेशयोः, मन्थ्यात् मथ्यात्। गद व्यक्तायां वाचि। णद अव्यक्तशब्दे। अर्द गतियाचनयोः। णर्द गर्द शब्दे, अगर्दीत्। अदु बन्धने, आनन्द। इदु परमैश्वर्ये, इन्दांचकार। णिदु कुत्सायां। दुनदु समृद्धौ। चदु दीप्त्याह्लादनोः। क्रदु रोदनाह्वानयोः, क्रन्देत् चक्रन्द क्रन्दिता। स्कन्दृ गतिशोषणयोः, स्कन्दतु अस्कदत् अस्कान्त्सीत् अस्का-



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

न्ताम् चस्कन्द । षिधु गत्यां । गतौ सेधो न षः, न्यसेधत् सिषेध । षिधौ शास्त्रमांगल्ययोः । धूगौदितः स्ताद्यशित आदिरिट् वा । अधश्चतुर्थात्तथोर्धः, असैद्धाम् सिषेध सेधिता सेद्धा । स्तन धन ध्वन चन स्वन वन शब्दे । जॄभ्रमवमत्रसफणस्यमस्वनराजभ्राजभ्रासभ्लासो वैर्न च द्विः अवित्परोक्षासेट्थवोः, स्वेनतुः सस्वनतुः । वन षन संभक्तौ । ये नवा खन्सिनिजनेराः ङ्किति, सायात् सन्यात् । गुपौ रक्षणे । गुपौधूपविच्छिपणिपनेरायः, गोपायति । अतो ये ङ्किति लुक्, गोपाय्यात् गोपायिता गोपिता गोप्ता । धूप तप संतापे । निसस्तपेऽनासेवायां षः, निष्टपति । रप लप जप व्यक्तवचने । जप मानसे व्यक्तोक्तौ च । सृप्लृ गतौ । स्पृशादिसृपो वाऽदन्तो रः, स्रप्ता सर्प्ता । लृदिद्द्युतादिपुष्यादेः परस्मै अद्यतन्यामङ्, असृपत् । चुबु वक्त्रसंयोगे । यभ जभ मैथुने । जभः स्वरे स्वरान्नोऽन्तः, जम्भति । चमू जमू जिमू अदने । ष्ठिवूक्लम्वाचमो दीर्घः शित्यत्यादौ, आचामति । क्रमू पादविक्षेपे । भ्रासभ्लासभ्रमक्रमक्लमत्रासित्रुटिलषियसिसंयसेर्वा श्यः शिति । क्रमो दीर्घः परस्मै शित्यत्यादौ, क्राम्यति क्रामति । क्रमोऽनुपसर्गाद्वात्मने, क्रमते । क्रमः स्ताद्यशित इडादिर्नात्मने, अक्रन्त अक्रमीत् । यमू उपरमे । गमिषद्यमश्छः शिति, यच्छति अयंसीत् । स्यमू शब्दे । णम प्रह्वत्वे । गम्लृ गतौ, गच्छति । गमहनजनखनघसः स्वरेऽनाङि क्ङिति लुगुपान्त्यस्य, जग्मतुः । गमोऽनात्मने आदिरिट् सादेः, गमिष्यति अगमत् । चर भक्षणे, अचारीत् । दल ञिफला विशरणे, फेलतुः पफलतुः अफालीत् । शील समाधौ । शूल रोगे । फल निष्पत्तौ । गर्व दर्पे । ष्ठिवू क्षिवू निरसने, ष्ठीवति । तिर्वा ष्ठिवः पूर्वस्य, तिष्ठेव टिष्ठेव । जीवु प्राणधारणे । गुर्वै उद्यमे । अव रक्षणगतिकान्तिप्रीतिषु । दृशृ प्रेक्षणे, पश्यति । अः सृजिदृशोऽकिति धुटि रः । हशिटो नाम्युपान्त्याददृशोऽनिटः सक्, अद्राक्षीत् अदर्शत्



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

ददृष्ठ ददर्शिथ द्रष्टा । दंश दशने, दशति दंष्टा । मूष स्तेये । कृष विलेखने, क्रष्टा कर्ष्टा । स्पृशमृषकृषतृपदृपो वाऽद्यतन्यां सिच्, अक्राक्षीत् अकार्क्षीत् अकृक्षत् । कष रुष रिष हिंसायां । सहलुभेच्छरुषारिषस्तादेरिड् वाऽऽदिः, रोषिता रोष्टा । उषू प्लुषू दाहे । जागुषसमिन्धेर्वाऽऽम् , ओषांचकार उवोष ऊषतुः । घस्ल अदने, अघसत् जघास । घस्वसो नाम्यादेः षः, जक्षतुः । सस्तः सि अशिति, घत्स्यासि । हसे हसने, अहसीत् । शसु हिंसायां, शशसतुः अशसीत् । दह भस्मीभावे, धक्ष्यति । रह त्यागे, अरहीत् । अर्ह मह पूजायां आनर्ह । रक्ष पालने । अक्षौ व्याप्तौ । वाऽक्षः शिति श्नुः । उश्नोः गुणोऽक्ङिति, अक्ष्णोति अक्ष्णुवन्ति आक्ष्णोत् आक्षीत् आनक्ष अक्षिता अष्टा । तक्षौ तक्षणे । तक्षः स्वार्थे वा श्नुः शिति, तक्ष्णोति काष्ठं, तक्षति । काक्षु कांक्षायां, अकांक्षीत् चकांक्ष ॥ इति परस्मैपदं ॥

गाङ् गतौ, गाते गाते । अनतोऽन्तोऽदात्मने, गाते अगास्त । स्मिङ् ईपद्धसने, स्मयते अस्मेष्ट । डीङ् विहायसा गतौ, अडयिष्ट अडयिढ्वम् अडयिध्वम् । पूङ् पवने । धृङ् अवध्वंसने, धरते । ऋवर्णात्सिजाशिषावनिटौ किद्वदात्मने, धृषीष्ट । देङ् त्रैङ् पालने । देर्दिगिः परोक्षायां न च द्विः, दिग्ये दिग्यिरे । इश्च स्थादः आत्मनेपदे, चात्सिच् कित्, अदित अदिपाताम् । प्यैङ् वृद्धौ । दीपजनबुधपूरितायिप्यायो वा ते ञिच् तलुक् च, अप्यायि अप्यायिष्ट । प्यायः पीः परोक्षायङोः, पिप्ये । अकुङ् लक्षणे, आनङ्के । लोकृङ् दर्शने, लुलोके । रेकृ शकुङ् शङ्कायाम् , अशङ्किष्ट । श्लाघृङ् कत्थने । लोचृङ् दर्शने । पिचि सेचने । पचुङ् व्यक्तीकरणे । एजृ भ्रेजृ भ्राजि दीप्तौ, एजांचक्रे एजामास एजांबभूव भ्रेजे बभ्राजे । तिजि क्षमानिशानयोः । गुप्तिजो गर्हाक्षान्तौ सन् , तितिक्षते तेजते । स्फुटि विकसने । चेष्टि चेष्टायाम् । वेष्टि वेष्टने । घटुङ् एकचर्यायाम् । मडुङ् मार्जने । घुणि घूर्णि भ्रमणे । पणि व्यवहारस्तुत्योः, पणायति, व्यवहारे पणते । यतैङ्



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्रयत्ने, येते। नाथृङ् उपतापैश्वर्याशीष्षु। आशिषि नाथः कर्त्तर्यात्मने, नाथते नाथति। वदुङ् स्तुत्यभिवादनयोः, ववन्दे। भदुङ् सुखकल्याणयोः। स्पदुङ् किञ्चिच्चलने। क्लिदुङ् परिदेवने। मुदि हर्षे। ददि दाने, दददे। हदि पुरिषोत्सर्गे। स्वदि आस्वादने। षूदि क्षरणे। ह्लादैङ् शब्दे सुखे च। एधि वृद्धौ। स्पर्द्धिं संघर्षे। दधि धारणे। पनि स्तुतौ, पनायति पेने। मानि पूजायाम्। शान्दान्मानबधात् निशानार्जवविचारवैरूप्ये स्वार्थे सन् दीर्घश्चेतः। सन्यस्य पूर्वस्येः। मीमांसते। टुवेपृ कपुङ् चलने। त्रपौषि लज्जायाम्, त्रेपे तत्रपे त्रपिषीष्ट त्रप्सीष्ट। गुपि गोपनकुत्सनयोः, जुगुप्सते। गल्भि धाष्टर्ये। ष्टभु स्कभु स्तम्भे। रभि राभस्ये। डुलभिष् प्राप्तौ। क्षमौषि सहने, चक्षमिषे चक्षण्षे। कमूङ् कामनायां। कमेर्णिङ्, कामयते। णेरनिट्यशिति लुक्। आद्योऽश एकस्वरो द्विः परोक्षाङे। असमानलोपे सन्वल्लघुनि ङे णौ इः। लघोर्दीर्घो-ऽस्वरादेरसमानलोपे ङे पूर्वस्य, अचीकमत अचकमत। अयि गतौ। उपसर्गस्यायौ रो लः, पलायते। दयायास्कासः परोक्षाया आम्, अयांचक्रे। दयि दानगतिहिंसादहनेषु। पूयैङ् दुर्गन्धिविशरणयोः। तायृङ् सन्तानपालनयोः। कलि शब्दसंख्यानयोः। षेवृङ् सेवने। परिनिवेः सिवो द्वित्वेऽट्यपि षः, न्यषेवत। काशृङ् दीप्तौ। क्लेशि विबाधने। भाषि च व्यक्तोक्तौ। स्रंसूङ् प्रमादे। कासृङ् शब्दकुत्सायाम्। भासि टुभ्लासि टुभ्रासि दीप्तौ, भ्रेसे बभ्रासे भ्लास्यते भ्लासते। रासृङ् शब्दे। आङ् शसुङ् इच्छायां। ग्रसू ग्लसूङ् अदने। ईहि चेष्टायां। गर्हिं कुत्सने। ऊहि तर्के, उपसर्गादस्योहो वात्मने। उपसर्गादूहो ह्रस्वः, समुह्यात्। गाहौङ् विलोडने। दाक्षि वृद्धौ शैघ्र्ये च। शिक्षि विद्योपादाने। भिक्षि याच्ञायाम्। दीक्षि मौण्ड्येज्योपनयननियमव्रतादेशेषु। ईक्षि दर्शने॥ इत्यात्मनेपदम्॥

श्रिग् सेवायाम्, अशिश्रियत् शिश्रिये। णीग् प्रापणे, अनै-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aradhak Trust

षीत् । हृग् हरणे। भृग् भरणे। धृग् धरणे। डुकृग् करणे। कृगुत-नादेरुः शिति, करोति । अतः शित्युत् कृगोऽविति, कुरुतः कुर्वन्ति । कृगो यि चोतो लुक् चाद्धम्यविति, कुर्मः कुरुते । कुरुच्छुरो न दीर्घः, कुर्यात् । गन्धनावक्षेपसेवासाहसप्रतियत्नप्रकथनोपयोगे कृगः आत्मने, उत्कुरुते । अधेः प्रसहने, तं हाधिचक्रे । डुयाचृङ् याच्ञायाम् । डुपचींष् पाके । राजृग् टुभ्राजी दीप्तौ, रेजतुः रराजतुः। भजी सेवायाम्। रञ्जी रागे, रजति । कुषिरञ्जेर्व्याप्ये वा परस्मै च कर्त्तरि श्यः, रज्यति स्वयं वस्त्रं, अरांक्षीत् । मेधृग् मेधाहिंसासंगमेषु । बुधृग् बोधने, अबोधीत् । खनूग् अवदारणे, अखानीत् अखनीत् चख्ने खायात् खन्यात् । दानी अवखण्डने, दीदांसते । शानी तेजने, शीशांसते । शपी आक्रोशे । अली भूषणपर्याप्तिवारणेषु । धावूग् गतिशुद्ध्योः । भेषृग् भये । लषी कान्तौ, लष्यति लषति लषते । चषी भक्षणे । त्विषी दीप्तौ । दासृग् दाने । माहृग् माने । गुहौग् संवरणे । गोहः स्वरे उपान्त्यस्योत्, निगूहते । स्वरेऽतः सको लुक्, अघुक्षाताम् अघुक्षन्त। दुहदिहलिहगुहो दन्त्यात्मने वा सको लुक्, अगुह्वहि अघुक्षावहि ॥इत्युभयपदं॥

द्युति दीप्तौ, द्योतते। द्युद्भ्योऽद्यतन्यां वात्मने, अद्युतत् अद्योतिष्ट । द्युतेरिः पूर्वस्य परोक्षायां, दिद्युते । रुचि अभिप्रीत्यां च । शुभि दीप्तौ । क्षुभी संचलने । स्रंभूङ् विश्वासे । भ्रंशूङ् स्रंसूङ् अवस्रंसने । ध्वंसूग् गतौ च । वृतुङ् वर्त्तने, अवृतत् अवर्तिष्ट । न वृद्भ्यः परस्मै स्ताद्यशित इट्। सिजाशिषावात्मने नाम्युपान्त्येऽनिटौ किद्वत्, वृत्सीष्ट । वृद्भ्यः स्यसनोर्वा कर्त्तर्यात्मने, वर्त्तिष्यते वर्त्स्यते । स्यन्दौङ् प्रस्रवणे । निरभ्यनोश्च स्यन्दस्याप्राणिनि कर्त्तरि वा षः, चात्परिनिवेः, पयः निष्ष्यन्दते निस्स्यन्दते । वृधौङ् वृद्धौ । कृपौङ् सामर्थ्ये । ऋर लृलं कृपोऽकृपीटादिषु, कल्पते अकल्पत् अकल्पिष्ट अक्लृप्त चक्लृपे । कृपः श्वस्तन्यां वात्मने कर्त्तरि, कल्पितासे कल्प्तासि । इति द्युतादिवृतादी-



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

मध्यम सिद्धप्रभा आख्याते ॥ ४५ ॥

वृद्धणौ ॥ ज्वल दीप्तौ, अज्वलत्। कुच संपर्चनकौटिल्यप्रतिष्टम्भविलेखनेषु। पत्लृ गतौ। श्वयत्यसूवचपतः श्वास्थवोचपप्तमङि, अपप्तत्। क्वथे निष्पाके। मथे विलोडने। पद्लृ विशरणगत्यवसादनेषु, सीदति। सदोऽप्रतेः परोक्षायां त्वादेः षः, निषीदति। श्रुसदवस्भ्यः परोक्षा वा भूते, निषसाद। शद्लृ शातने। शदेः शिति कर्त्तर्यात्मने, शीयते अशादीत्। बुध अवगमने। टुवमू उद्गिरणे (वमने), वेमतुः ववमतुः। भ्रमू भ्रान्तौ, भ्राम्यति भ्रमति भ्रेमतुः बभ्रमतुः। चल कम्पने। बल प्राणनधान्यावरोधयोः। क्रुश आह्वानरोदनयोः। रुह जन्मनि, अरुक्षत्। रमि क्रीडायाम्। व्याङ्परे रमः परस्मै, विरमति। षहि सहने। असोङसिवुसहस्सटां परिनिवेः सः षः, परिषहते। स्तुस्वञ्जश्चाऽटि नवा पूर्ववत्पर्यादेः, पर्यषहत पर्यसहत ॥ इति ज्वलादयः॥

यजी देवपूजासंगतिकरणदानेषु, यजति अयष्ट। यजादिवशवचः सस्वरान्तस्था य्वृत्पूर्वा परोक्षायां, इयाज। यजादिवचेः किति परस्या अपि य्वृत्, ईजतुः इयजिथ इयष्ठ। व्येग् तन्तुसन्ताने, व्ययति व्ययते। ज्याव्येव्यधिव्यचिव्यथेरिः पूर्वस्य, विव्याय विव्यतुः। व्यस्थव्णवि नात्त्वं, विव्ययिथ। वेग् संवरणे। वेर्वय् वा परोक्षायाम्, उवाय। वेरयो न य्वृत्, ववौ ववतुः। अविति वाऽयन्तस्य य्वृत्, य्वृत् सकृत, ऊवतुः। न वयो य् य्वृत्, ऊयतुः। य्वोः प्वय्व्यञ्जने लुक्, उवयिथ उवथ। ह्वेग् स्पर्द्धाशब्दयोः, ह्वयति ह्वयते। द्वित्वे ह्वो य्वृत्, जुहाव जुहुवतुः। ह्वालिप्सिचोऽद्यतन्यामङ्, आह्वत्। वात्मनेऽङ् ह्वादेः, आह्वत आह्वास्त। टुवपी वापे, उवाप ऊपतुः उप्यात्। वही प्रापणे, उवाह। ट्वोश्वि गतिवृद्ध्योः, श्वयति अश्वत् अशिश्वियत् अश्वयीत्। वा परोक्षायङि श्वेर्य्वृत्, शुशाव शिश्वाय शूयात्। वद व्यक्तायां वाचि, ऊदतुः। दीप्तिज्ञानयत्नाविमत्युपसंभाषोपमन्त्रणे वदः कर्त्तर्या-

भ्वादिषु यजादयः ॥ ४५ ॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

त्मने, वदते विद्वान्स्याद्वादं। व्यक्तवाचां सहोक्तौ, संप्रवदन्ते ग्राम्याः। विवादे वा। वस निवासे, उष्यात् वत्स्यति ॥ इति यजादयः ॥

घटिष् चेष्टायाम्। व्यथिष् भयचलनयोः, विव्यथे। प्रथिष् प्रख्याने। म्रदिष् मर्दने। ञित्वरिष् संभ्रमे। श्रा पाके। रगे शङ्कायाम्। लगे संगे। ज्वर रोगे। ज्वल दीप्तौ ॥ इति घटादयः ॥ इति भुवादयः ॥

अथादादिः। अद प्सा भक्षणे, अत्ति। हुधुटो हेर्धिः, अद्धि अत्तात्। अदश्चाट् शितोर्दिस्योः, चाद्रुत्पञ्चकात्, आदत् आदः। घस्लृ सनद्यतनीघञचल्यदः, अघसत्। परोक्षायां नवा, जघास आद। वा द्विषातोऽनः पुस्, अप्सुः अप्सान्। भा दीप्तौ। या प्रापणे। वा गतिगन्धनयोः। ष्णा शौचे, सस्नौ सस्नतुः। द्रा कुत्सितगतौ। पा रक्षणे, अपासीत् पायात्। दाव् लवने, अदासीत्। ख्या कथने। शास्त्यसूवक्तिख्यातेरङ् अद्यतन्यां, आख्यत्। मा माने, अमासिषुः मेयात्। इ स्मरणे, अध्येति अधीतः। इको वा स्वरेऽविति शिति यः, अधियन्ति अधीयन्ति। एत्यस्तेर्वृद्धिर्ह्यस्तन्याममाङा, आयन्। इणिकोर्गाऽद्यतन्यां, अगात्। इण् गतौ, एति। ह्विणोरप्विति शिति स्वरे य्वौ, यन्ति अगात् इयाय। इण इय् स्वरे, ईयतुः। आशिषीण उपसर्गात्ङ्किति यि ह्रस्वः, उदियात्। षु प्रसवैश्वर्ययोः। उत और्विति व्यञ्जनेऽद्वेः, सौति। धूग्सुस्तोः परस्मै सिच आदिरिट्, असावीत्। तु वृत्तिहिंसापूरणेषु। यङ्तुरुस्तोर्बहुलं व्यञ्जनादौ विति परादिरीत्, तवीति तौति। यु मिश्रणे, यौति। णु स्तुतौ, अनावीत् नुनाव। क्ष्णु तेजने। स्नु प्रस्रवणे, सुस्नोथ। स्नोरनात्मने स्ताद्यशित आदिरिट्, सुस्नविथ। टुक्षुरुकु शब्दे, रौति रवीति अरौषीत्। रुदृ अश्रुविमोचने। रुत्पञ्चकाच्छिदयो व्यञ्जनादेरादिरिट्, रोदिति। दिस्योरीट् रुत्पञ्चकात्, अरोदीत् अरुदत्। ञिष्वप् शयने, स्वपिति



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

सुष्वाप। स्वपेर्यङ्ङे च य्वृत् , चात्किति, सुषुपतुः। अवः स्वपः, निर्दुःसुवेः स्वपः सः षो, न चेद्द्वोऽन्ते, निःष्वापिति। अन श्वस प्राणने। द्वित्वेऽप्यन्तेऽप्यनितेर्णः, परेस्तु वा, प्राणिति पर्यणिति पर्यनिति अश्वासीत्। जक्ष भक्षणहसनयोः। अन्तो नो लुक् दृव्युक्तजक्षपंचकाच्छितोऽवितः, जक्षति । एषामीर्व्यञ्जनेऽदः दृव्युक्तजक्षपञ्चकस्यादः शित्यविति, जक्षीतः। दृव्युक्तजक्षपञ्चतः शितोऽवितोऽन: पुस्, अजक्षुः। दरिद्रा दुर्गतौ। इर्दरिद्रः शित्यविति व्यञ्जने, दरिद्रितः। श्नश्चातो चाद् दृव्युक्तजक्षपञ्चकस्य लुक् शित्यविति, दरिद्राति दरिद्रियात् दरिद्रांचकार औवचनात् ददरिद्रौ । अशित्यस्सन्णकचूणकानटि दरिद्रो लुक्, दरिद्र्यात्। दरिद्रोऽद्यतन्यां वा लुक्, अदरिद्रीत् अदरिद्रासीत्। जागृ निद्राक्षये। व्यञ्जनाद्देर्लुक् सश्च दः, अजागः। जागुर्ञिणवि वृद्धिः, जजागार जागरांचकार । जागुः किति गुणः, जजागरतुः जागर्यात् । चकासृ दीप्तौ । सो धि वा लुक्, चकाधि चकाद्धि अचकात् । सेः स्द्धाश्च रुर्वा व्यञ्जनात्, चाल्लुक्, अचकाः अचकाद्वा। शासू अनुशिष्टौ, शास्ति। इसासः शासोऽङ्व्यञ्जने ङ्किति, शिष्टः शासति। शासस्हनः शाध्येधिजहि हिना, शाधि अशिषत्। वच भाषणे, अवक् अवोचत् ऊचतुः। विद् ज्ञाने, वेत्ति । समो गमृच्छिप्रच्छिश्रुवित्स्वरत्यर्त्तिदृश आत्मने। वेत्तेर्नवाऽऽत्मनेऽन्तो रत्, संविद्रते संविदते । तिवां णवः परस्मै वेत्तेर्वा, विवेद । पञ्चम्याः कृग्वाऽऽम् कित् वेत्तेः। वेत्तेः किदाम्, विदांकरोतु वेत्तु अवेद् अवेः। हन हिंसागत्योः । यमिरमिनमिगमिहमिमनिवनतितनादेर्धुटि ङ्किति लुक्, हतः घ्नन्ति । हनो रादेर्नो णः, प्रहण्ति। वामि वा, प्रहण्मि प्रहन्मि। ञिणवि घन्, जघान जघ्नतुः। हनो वध आशिष्यञौ, वध्यात्। अद्यतन्यां वा त्वात्मने, अवधीत्। अस भुवि। श्नास्त्योर्लुक् शित्यविति, स्तः। अस्तेः सि सलुक् हस्त्वेति, असि



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

आसीत् आसन् । अस्तिब्रुवोर्भूवचावशिति, बभूव । यङ्लुप् अदादौ । इति परस्मैपदं ॥

इङ् अध्ययने, अधीयाते अध्यैष्ट । वाऽद्यतनीक्रियातिपत्त्योर्गीङ् इङः, अध्यगीष्ट । गाः परोक्षायाम् इङः, अधिजगे । शीङ् स्वप्ने । शीङ एः शिति, शेते । शीङो रदन्तः, शेरते । षूङ् प्रसवे, सुवाते । सूतेः पञ्चम्यां न गुणः, सुवै । इडि स्तुतौ, इट्टे । ईशिडः सेध्वेस्वध्वमोरादिरिट्, इडिषे । ईरि गतिकम्पनयोः, ईर्त्ते । ईशि ऐश्वर्ये, ईशिध्वम् । आङ् शासूङ् इच्छायाम्, आशास्महे । आसि उपवेशने । चक्षि व्यक्तोक्तौ । चक्षो वाचि क्शांग् ख्यांगशिति, चक्शे ख्यासीष्ट ॥ इत्यात्मने पदं ॥

ऊर्णुग् आच्छादने । वोर्णोर्व्यञ्जनादौ विति औः, ऊर्णौति ऊर्णोति । न दिस्योः, और्णोत् । स्वरादेर्द्वितीयः एकस्वरोऽशो द्विः । न बदनं संयोगादि द्विः । अयि रो न द्विः, ऊर्णुनाव । वोर्णोरिड् ङिद्वत्, ऊर्णुनुविथ ऊर्णुनविथ । वोर्णुगः सेटि सिचि वृद्धिः, और्णावीत् और्णवीत् । ब्रूग् व्यक्तोक्तौ । ब्रूतेः परादिर्व्यञ्जनादौ वितीत्, ब्रवीति । ब्रूगः पञ्चानाम् तिवां पञ्च णव आहश्च, आहुः आत्थ । द्विषी अप्रीतौ । दुही क्षरणे, धोक्ष्यति । दिही लेपे । लिहीं आस्वादने, लेढि । ष्टुग् स्तुतौ । उपसर्गात्सुग्सुवसोस्तुस्तुभोऽद्यप्यद्वित्वे षः, अभ्यष्टौत् ॥ इत्युभयपदं ॥

हु दानादनयोः । ह्वः शिति द्विः, जुहोति जुह्वति जुहुधि । पुस्पौ गुणः, अजुहवुः अहौषीत् । भीह्रीभृह्वोस्तिव्वद्वाम्, जुहवांचकार जुहाव । ओहाक् त्यागे । हाकः शित्यविति व्यञ्जने इर्वा, जहितः जहीतः जहति । यि लुक् शिति हाकः, जह्यात् । आ च हौ चादिदीतौ, जहाहि जहीहि जहिहि अजहुः हेयात् । ञिभी भये, बिभेति । भियो नवा शित्यविति व्यञ्जने इः, बिभितः बिभीतः बिभयांचकार बिभाय । ह्री लज्जायां, जिहेति जिह्रीतः जिह्रियति । पॄ पालनपूरणयोः ।



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

पॄभृमाहाङामिः शिति पूर्वस्य, पिपर्त्ति । ओष्ठ्यादुर् ॠतः क्ङिति उपान्त्यस्यापि, पिपूर्त्तः पिप्रति पूर्यात् । ऋ गतौ, प्रित्यादिना इयर्त्ति इति परस्मैपदं ॥

ओहाङ् गतौ, जिहीते । माङ् माने, मिमीते मिमते ममे ॥ इत्यात्मनेपदं ॥

डुदाग् दाने, ददाति दत्तः दद्यात् । हौ द एर्न च छ्विः, देहि अदात् अदित । डुधाग् धारणे च, धागस्तथोश्चस्ध्वोर्दः धत्तः दधति धद्ध्वम् । डुभृग् भरणपोषणयोः, बिभर्ति बिभरांचकार बभार । ऋवर्णश्र्युर्णुगः कितो नेट्, बभृषे ॥ इति ह्वादिगणः । इति अदादयः कितः ॥

दिवू क्रीडाजयेच्छापणिद्युतिस्तुतिगतिषु । दिवादेः श्यः । भ्वादेरिति दीव्यति । जॄष् झॄष् जरसि, जीर्यति अजरत् अजारीत् जेरतुः जजरतुः जीर्यात् जरिता जरीता । शो तक्षणे । ओतः श्ये लुक्, श्यति अशात् अशासीत् । दो छो छेदने । षो अन्तकर्माणि । नृतै नर्तने । कृतचृतछृदतृदनृतोऽसिचः सादेर्वाऽशितीट्, नर्तिष्यति नर्त्स्यति । व्यध ताडने । ज्याव्यधः क्ङिति य्वृत्, विध्यति विविधतुः अव्यात्सीत् । षिवू ऊतौ, निषीव्यति । ष्ठिवू निरसने, ष्ठीव्यति । त्रसै भये, त्रेसतुः तत्रसतुः । पुष पुष्टौ, अपुषत् पोष्टा । क्षुध बुभुक्षायां । शुध शुद्धौ । क्रुध कोपे । षिधू सिद्धौ, असैत्सीत् । गृधू गार्ध्ये । तृपौ प्रीतौ । दृपौ हर्षमोचनयोः, अदार्प्सीत् अदृपत् । लुभ गार्ध्ये । क्षुभ चलने । नशौ अदर्शने । नशो धुटि स्वरान्नोऽन्तः । नशः शः, शान्तनशो रादेर्नो णः, प्रणश्यति । नशेर्नेश् वाऽङि, अनेशत् अनशत् । भ्रंशू अधःपतने, भ्रश्यति अभ्रंशीत् बभ्रंशतुः । शुष शोषे, शोष्टा । दुष वैकृत्ये । श्लिष आलिंगने, श्लिषोऽनिटोऽद्यतन्यां सक्, अश्लिक्षत्, नासत्त्वाश्लेषे । ञितृष पिपासायां । तुष तोषे । रुष रोषे । असू क्षेपणे, अस्थत् । यसू प्रयत्ने । शमू दमू उपशमे । शमसप्तकस्य दीर्घः श्ये, शाम्यति । श्रमू खेदतपसोः । क्लमू ग्लानौ । मुहौ मोहे । द्रुहौ





P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

द्रोहे। ष्णिहौ प्रीतौ ॥ इति पुषादयः ॥ इति परस्मैपदं ॥ षूङो प्राणिप्रसवे,सूयते सुषुविषे। दूङ् परीतापे। दीङ् क्षये, अदास्त। दीय् दीङः क्ङिति स्वरे, दिदीये। यबाक्ङिति दीङ आः। दाता लीङ् श्लेषणे, लीयते। लीङ्लिनोर्वाऽऽयबक्ङिति, लाता ॥ इति स्वादिः ॥ पदि गतौ। ञिच् ते पदेस्तलुक् च, उदपादि। बुधि मनि ज्ञाने, भोत्स्यते अबोधि अमत। जनै जातौ। जा ज्ञाजनोऽत्यादौ शिति, जायते जज्ञे। न जनवधः क्ङिति ञ्णिति ञौ च वृद्धिः, अजनि अजनिष्ट। दीपै दीप्तौ, अदीपि। क्लिशङ् उपतापे ॥ इत्यात्मनेपदं ॥ शकी मर्षणे। शुचृगै पूतीभावे। रञ्जी रागे। शपी आक्रोशे। मृषी तितिक्षायां। णही बन्धने, नह्यते अनात्सीत् ॥ इति दिवादिगणाश्चित्।

पुग् पीडास्नानयोः। स्वादेः श्नुः शिति, निषुणोति। वम्यविति वा असंयोगादोर्लुक्, निषुणुवः निषुण्वः। सुगः स्यसनि न षः, निसोष्यति असावीत्। डुमिग् प्रक्षेपणे। मिमीगोऽखलचलि यबक्ङिति आः, अमासीत्। चिग् चयने। चेः किर्वा सन्परोक्षयोः, चिकाय चिचाय चिक्ये। धूग् कम्पे, अधावीत्। स्तृग् आच्छादने। इट् सिजाशिषोरात्मने संयोगादेः ऋतो वादिरिट्, स्तरिषीष्ट। ऋवर्णादनिटौ सिजाशिषावात्मने कित्, स्तृषीष्ट। कृग् हिंसायां। वृग् वरणे ॥ इत्युभयपदं ॥ हि गतिवृद्ध्योः, प्रहिणोति। अङे हिहनो हो घः पूर्वात्, जिघाय। श्रु श्रवणे, शृणोति। टुदु उपतापे। पृ प्रीतौ। स्मृ पालने च। शक्लृ शक्तौ। आप्लृ व्याप्तौ, आप्नुवन्ति आप्नुहि आपत्। कृवु हिंसाकरणयोः, कृणोति। धिवु गतौ, धिनोति ॥ इति परस्मैपदं ॥ अशौङ् व्याप्तौ, आक्षीत् आनशे ॥ इति स्वादयष्टितः ॥

तुदी व्यथने। तुदादेः शः शिति, तुदति। भ्रस्जी पाके। ग्रहवृश्चभ्रस्जप्रच्छः क्ङिति य्वृत्, भृज्जति। भृज्जो भर्ज् वाऽशिति; बभर्ज बभ्रज्ज बभर्ष्ठ भृज्ज्यात् भर्ष्टा। क्षिपी प्रेरणे, अक्षै-





P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

78469

प्सीत्। मिल संगमे। मुच्लृ मोक्षे। मुचादितृफदृफगुफशुभोभः शे नोऽन्तः स्वरात्, मुञ्चति अमुचत्। पिची क्षरणे। विदॢ लाभे, विन्दति। लुप्लृ छेदे। लिपी उपचये, लिम्पति। इत्युभयपदं। कृतै छेदने, कृन्तति कर्तिष्यति कर्त्स्यति। खिद खेदे, खेत्ता॥ इति मुचादिः॥ मृ प्राणत्यागे। म्रियतेरद्यतन्याशिषि चात्मनेपदं, चाच्छिति, म्रियते ममरतुः अमृत मृषीष्ट। कॄ क्षेपे। किरो लवने उपात् स्सडादिः। प्रतेश्च वधे। अपाच्चतुष्पाद्पक्षिशुनि हृष्टान्नाश्रयार्थे। अपास्किरः आत्मने, अपास्किरते चकरतुः अकारीत्। गॄ निगिरणे। नवा स्वरे ग्रो रो लः, गिलति गीर्यात्। लिख अक्षरन्यासे। त्वच संवरणे। ओव्रश्चौ छेदने, वृश्च्यात्। ऋच्छ इन्द्रियप्रलयमूर्तिभावयोः, आनर्च्छ। विच्छ गतौ, विच्छायेत्। प्रच्छ प्रश्ने, पृच्छति। अनुनासिके च छ्वः शूट् चात् धुडादौ, अप्राक्षीत् पप्रच्छ प्रष्टा। उच्छै समाप्तौ। म्लिच्छ उत्क्लेशे। उच्छु उञ्छे। सृज विसर्गे, ससर्जिथ सस्रष्ठ अस्राक्षीत्। टुमस्जो शुद्धौ। मस्जेः सो नो धुटि, ममङ्क्थ। मुण प्रतिज्ञाने। चृतै हिंसाग्रन्थयोः, चर्तिष्यति चत्स्र्यति। नुद प्रेरणे, अनौत्सीत्। तृफ तृंफ गुप्तौ, तृम्फति। स्पृश स्पर्शे, स्प्रक्ष्यति स्पर्क्ष्यति। विश प्रवेशे। मृश विचारे, अमार्क्षीत् अमृक्षत्। इष इच्छायां, इच्छति एषिता एष्टा। कुट कौटिल्ये। कुटादेर्ङिद्वदञ्णित्, चुकुटिथ। गु पुरीषोत्सर्गे। ध्रु गतिस्थैर्ययोः। णू स्तवने। चुट छुट त्रुट छेदने। स्फुर स्फुरणे। निर्नेः स्फुरस्फुलोः षो वा, निःष्फुरति। वेर्वा, विष्फुलति। इति परस्मैपदं। इति कुटादयः॥ पृङ् व्यायामे, व्याप्रियते। दृङ् आदरे, आदद्रे। ष्वञ्ज सङ्गे। स्वञ्जश्चोपसर्गनाम्यादेः षो द्वित्वेऽप्यपि परोक्षायां त्वादेः, अभिषस्वजे। स्वञ्जेर्नवाऽवित्परोक्षा कित्, अभिषस्वञ्जे। इत्यात्मनेपदं, इति तुदादयस्तितः॥

रुधृग् आवरणे। रुधां स्वराच्छ्नो नलुक् च, रुणद्धि रुन्द्धः रुन्द्धे अरुणत् अरौत्सीत्। विचृग् पृथग्भावे। युजृग् योगे। भिदृग्



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विदारणे । छिदृग् द्वैधीकरणे । ऊछृदृग् दीप्तिदेवनयोः । उतृदृग् हिंसानादरयोः ॥ **इत्युभयपदं** ॥ भञ्जो भङ्गे, भनक्ति । भुज पालनाभ्यवहारयोः, भोक्ता । अञ्जो व्यक्तिम्रक्षणकान्तिगतिषु, आनक् । **सिचोऽञ्जेरादिरिट्**, आञ्जीत् । शिष्लृ विशेषणे, शिण्ढि । पिष्लृ पेषणे । हिसु हिंसायां ॥ **इति परस्मैपदं** ॥

खिदि दैन्ये विदि विचारणे । ञिइन्धैङ् दीप्तौ, समिधांचक्रे ॥ **इत्यात्मनेपदं** ॥ **पित एते रुधादयः** ॥

तनूग् विस्तारे, तनोति तनुते । **तन्भ्यो वा तथासिन्णोश्च सिचो लुप् न चेट्**, अतत अतनिष्ट । क्षणू क्षिणूग् हिंसायां, अक्षणीत् । घृणूग् दीप्तौ । षणूग् दाने । **सनस्तत्रा वा नलुकि**, असात असत ॥ **इत्युभयपदं** ॥ वनूङ् याचने । मनूङ् अवबोधे । **इत्यात्मनेपदं** । **इति यितस्तनादयः** ॥

डुक्रीग् क्रयणे । **क्र्यादेः शिति श्ना**, क्रीणाति क्रीणीते क्रीणते । प्रीग् तृप्तिकान्त्योः । मीग् हिंसायां, अमास्त । षिग् बन्धने । ग्रही उपादाने, गृह्णाति, गृह्णीतः । **व्यञ्जनाच्छ्नाहेरानः**, गृहाण । **गृह्णोऽपरोक्षायां दीर्घ इटः**, ग्रहीता । पूग् पवने । **प्वादेर्ह्रस्वः** शित्यत्यादौ, पुनाति । लूग् छेदने । धूग् कम्पे । स्तॄग् आछादने । वृग् वरणे ॥ **इत्युभयपदं** ॥ ज्या वयोहानौ । **दीर्घमवोऽन्त्यं य्वृत्**, जीनाति । ली श्लेषणे । शॄ हिंसायां । **ॠः शॄदॄप्रः परोक्षायां वा**, शशरतुः शश्रतुः । पॄ पालनपूरणयोः । दॄ विदारणे । गॄ शब्दे । इति प्वादिः । ज्ञा ज्ञाने, जानाति । मन्थ विलोडने । ग्रन्थ संदर्भे । बन्ध बन्धने । अश् भोजने । मुष स्तेये । पुष पुष्टौ ॥ **इति परस्मैपदं** ॥ वृङ् संभक्तौ ॥ **इत्यात्मनेपदं** ॥ **इति क्र्यादयः शितः** ।

चुर स्तेये । **चुरादिभ्यो णिच्**, चोरयति, **णीत्यादिनां ङे । उपान्त्यस्यासमानलोपिशास्वृदितो ङे णौ ह्रस्वः**, अचूचुरत् । **आमन्ताल्वाय्येत्नावय् णेः**, चोरयामास, चोर्यात् चोरयिता । टकु बन्धने, टङ्कयति टङ्कति, अनित्यो णिच् । अर्क



P.P. Ac. Sunratnasuri M.S.
Jun Gun Aaradhak Trust

स्तवने, आर्किकत् । पूज पूजायां । रुज हिंसायां । लुट स्तेये । घट्ट सञ्चलने । ओलडु उत्क्षेपे । पीड गहने । भ्राजभासभाषदीपपीडजीवमीलकणरणवणभणश्रणह्वेहेठलुटलुपलपां नवा णावुपान्त्यस्य ह्रस्वः, अपिपीडत् अपीपिडत् । तड आघाते । खुड्ड भेदे । कड्ड खण्डने च । मड्ड भूषायां । श्रण दाने, अशश्राणत् अशिश्रणत् । चितु स्मृत्यां । कृत संशब्दने । कृतः कीर्तिः । ऋद्वर्णस्य ङे वा णावुपान्त्यस्य, अचीकृतत् अचिकीर्तत् । प्रथ प्रख्याने । स्मृदृत्वरप्रथम्रदस्तृस्पृशेरः असमानलोपे ङे णौ, अपप्रथत् । छद संवरणे । बुध हिंसायां । गर्ध गार्ध्ये । बन्ध संयमने, अबीबधत् । व्यय क्षये । यत्रु सङ्कोचे । श्वभ्र गतौ । तिल स्नेहने । लक्ष शौचे । तुल उन्माने । सान्त्व सामप्रयोगे । लुष हिंसायां । रुष रोषे । पुस अभिमर्दने । पक्षि परिग्रहे । लक्षी दर्शनाङ्कनयोः ॥ इतोऽर्थविशेषे-ज्ञा मारणादिनियोजनेषु । मारणतोषणनिशाने ज्ञश्च णिच्याणिचि णौ ह्रस्वः, जिणम्परे तु वा दीर्घः । अर्त्तिरीब्लीह्रीक्नूयिक्ष्माय्यातां णौ पुरन्तः, ज्ञपयति अजिज्ञपत् । चर्च अध्ययने । नवगण्युक्ता हिंसार्थाश्च स्वार्थे ण्यन्ताः । कृत अवकल्कने । अम रोगे । भूष अलङ्कारे । अर्ह पूजायां । मोक्ष असने । घुष विशब्दने, अविशब्दार्थस्य घुषेरनित्यो णिच्, जुघुषुः । वञ्चि प्रलम्भने । तर्जि संतर्जने । वस्ति गन्धि अर्दने । शम आलोचने । तन्त्रि कुटुम्बधारणे । मन्त्रि गुप्तभाषणे । स्पशि ग्रहणश्लेषणयोः, अपस्पशत् । भर्त्सि संतर्जने । अथ अदन्ता णिच्येव । अङ्क लक्षणे । अतोऽशिति लुक्, अङ्कयति । आङ्किकत् । सुख दुःख तत्क्रियायां, अल्लुकः स्थानित्वात् सुखयति । अघ पापकरणे । सभाज प्रीतिसेवनयोः । दण्ड निपातने । गण संख्याने । ई च गणो ङे चादः, अजीगणत् अजगणत् । यथादर्शनमन्यत्राचीकथत् । कथ वाक्यप्रबन्धे । स्तन गर्जे । ध्वन शब्दे । भाम क्रोधे । साम सान्त्वने । सूत्र सूत्रणे । मूत्र प्रस्रवणे । कुमार क्रीडायाम् । कल संख्यानग-

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

त्योः। शील उपधारणे। रस आस्वादनस्नेहनयोः। मह पूजायां। स्पृह ईप्सायां ॥ इति परस्मैपदं ॥ मृगण् अन्वेषणे। अर्थङ् याचने। संग्रामङ् युद्धे ॥ इत्यात्मनेपदं ॥ युज संपर्चने। युजादेर्नवा स्वार्थे णिच्, योजयति योजति। प्रीग् तर्पणे। धूग्प्रीगोर्नः णौ, प्रीणयति। धूग् कम्पने, धूनयति। मार्ग अन्वेषणे। आर्चि पूजायां। विद भाषणे। वद संदीपने। ईर क्षेपे। धृष प्रसहने। गर्ह निन्दने ॥ इति युजादिः ॥ इति चुरादयो णितः। प्रयोक्तृव्यापारे णिग् वा धातोः, कुर्वन्तं प्रयुंक्ते इति कारयति अचीकरत्। भूङः प्राप्तौ णिङ्, भावयते। ओर्जान्तस्थापवर्गेऽवर्णे पूर्वस्येः सनः, सन्वदिति अबीभवत्, जावयति अजीजवत् अयीयवत्। श्रुस्रुद्रुप्रुप्लुच्योर्वा, अशिश्रवत् अशुश्रवत् अशशासत्। पाशाच्छासावेव्याह्वो योऽन्तो णौ, पाययति ह्वाययति। णौ ङसनि ह्वो य्वृत्, अजूहवत्। श्वेर्वा, अशूशवत् अशिश्वयत्, आर्चिचत् अतत्वरत् अपीपयत्। वा वेष्टचेष्टः पूर्वस्यात्, अववेष्टत् अविवेष्टत्। कण वण रण भण शब्दे, अचीकणत् अचकाणत्, असूषुपत्। णौ क्रीजीङः आः, क्रापयति। अर्थापयति। सत्यार्थवेदस्याः। अध्यापयति अध्यापीपत्। णौ सन्ङे वा इङो गाः, अध्यजीगपत्। सनि अधिजिगापयिष्यति अध्यापिपयिषति। तिष्ठतेरिः उपान्त्यस्य, अतिष्ठिपत्। जिघ्रतेरिर्वा, अजिघ्रिपत् अजिघ्रपत्। पातेर्लः पालयति। लियो नोऽन्तः स्नेहद्रवे। लो लः स्नेहद्रवे, लालयति लापयति। लीङ्लिनोऽर्चाभिभवे चाच्चाकर्त्तर्यपि, प्रलम्भे चात्, आलापयते। प्रलम्भे गृधिवञ्चेर्णेरात्मने, गर्धयते। स्मिङः प्रयोक्तुः स्वार्थे णिग आदात्मने च, विस्मापयते। बिभेतेर्भीष् च, भीषयते भापयते। सिध्यतेरज्ञाने आः, साधयति। स्फायः स्फाव्, स्फावयति। शदेरगतौ शात्, शातयति। रुहः पो वा, रोपयति रोहयति। ऊद् दुषो णौ, दूषयति। चित्ते वा, दूषयति दोषयति वा चित्तं। णौ मृगरमणे रञ्जेर्नो लुक्, रजयति मृगः।

च्चिस्फुरोर्नवाऽऽत्, चापयति चाययति स्फारयति स्फोरयति । **घटादेर्ह्रस्वो दीर्घस्तु ञिणम्परे णौ वा,** घटयति । **कगेवनूजनैजॄष्क्नस्रञ्जः,** कगयति जनयति । **अमोऽकम्यमिचमः,** रमयति, कामयति । **पर्यपाभ्यां स्खदः,** परिस्खदयति । **शमोऽदर्शने णौ ह्रस्वो ञिणम्परे तु वा दीर्घः,** शमयति । **ज्वलह्वलह्मलग्लास्नावनूवमनमोऽनुपसर्गस्य वा णौ ह्रस्वः,** ज्वलयति नमयति नामयति । **ञ्णिति घात् हनः,** घातयति । **णावज्ञाने गमुरिणिकोः,** गमयति अध्यापयति **णौ सन्ङे वेङो गा :,** अध्यजीगपत् अध्यापिपत् यापयति । **ङे पिबः पीप्य्,** अपीप्यत् । **इति णिगन्ताः ॥**

**तुमर्हादिच्छायां सन्नतत्सनः,** भवितुमिच्छति । **नामिनोऽनिट् सन् कित् । ग्रहगुहश्च सनो नादिरिट्,** चादोः, बुभूषति अबुभूषीत् । **रुदविदमुषग्रहस्वपप्रच्छः सन् च कित्,** चात्क्त्वा । **उपान्त्ये नामिन्यनिट् सन् कित्,** जिघृक्षति । **स्वपो णावुः पूर्वस्य,** सुष्वापयिषति । सुषुप्सति । **ऋस्मिपूङञ्जशौकॄगृहृधृप्रच्छः सन आदिरिट्, प्राग्वत् सनः आत्मने,** पिपविषते अरिरिषति चिकरिषति । **स्वरहन्गमो धुटि सनि दीर्घः,** चिचीषति चिकीर्षति जिघांसति । **तनो वा,** तितांसति तितंसति । **सनीङश्च गमुरज्ञाने,** चादिणिकोः, अधिजिगांसते जिगमिषति । **इवृधभ्रस्जदम्भश्रियूर्णुभरज्ञपिसनितनिपतिवृदरिद्रः सन आदिरिड् वा । अनुनासिके च च्छ्वः शूट्,** चात्क्त्व धुटि प्रत्यये च, दुद्यूषति दिदेविषति । **ऋध इर्त् सि सनि वा** इत्र्सति अर्दिधिषति बिभ्रक्षति बिभर्क्षति बिभ्रज्जिषति । **दम्भो धिप् धीप् सि सनि,** धिप्सति धीप्सति । **ज्ञप्याप्पो ज्ञीपीप्,** ज्ञीप्सति जिज्ञपयिषति । **वौ व्यञ्जनादेः सन्चाय्वः, इदुदुपान्त्याद्य्वन्ताद् व्यञ्जनादेः सन् क्त्वा च किद्वा,** दिद्युतिषते दिद्योतिषते । **मिस्मीमादाम्भित्स्वरस्य सि सनि,** मित्सति दित्सति धित्सति ।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रभलभशकपतपदामिः, शिक्षति लिप्सति पित्सति । अव्याप्यस्य मुचेर्मोग्वा, मोक्षते मुमुक्षते वा चैत्रः । स्मृदृशः सन आत्मने, दिदृक्षते सुस्मूर्षते । सञ्जेर्वा षणि षः ण्यन्तस्य, सिषञ्जयिषति सिसनिषति जिजविषति शिश्रावयिषति प्राणिणिषति जुगुप्सिषते ॥ इति सन्नन्तप्रक्रिया ॥

व्यञ्जनादेरेकस्वराद् भृशाभीक्ष्ण्ये यङ् वा, भृशं आतिशयेन वा भवतीति। आगुणावन्यादेः पूर्वस्य, बोभूयते। अत्यर्तिसूत्रिमूत्रिसूच्यशूर्णोर्यङ्, अरार्यते । ( योऽशिति लुक् व्यञ्जनात् ) अरारांचक्रे बेभिदिता मोमूत्रिषीष्ट औणोनुविष्ट। गत्यर्थात् कुटिले। मुरतोऽनुनासिकस्य पूर्वस्य, चंक्रम्यते। गृलुपसदचरजपजभदंशदहो गर्ह्ये। ग्रो यङि रो लः, जेगिल्यते लोलुप्यते सासद्यते। चरफलां पूर्वस्य मुरन्तः। ति चोपान्त्यातोऽनोदुश्चरफलां, चाद् यङि, चञ्चूर्यते पम्फुल्यते। जपजभदहदंशभञ्जपशो मुरन्तः, दन्दश्यते पम्पश्यते जञ्जप्यते। ईर्व्यञ्जने गापास्थासादामाहाकोऽयपि, देदीयते तेष्ठीयते जेहीयते शोशूयते शेश्वीयते चेक्रीयते। न गृणाशुभरुचो यङ्। चायः कीः, चेकीयते। घ्राध्मोर्यङ्गीः, जेघ्रीयते देध्मीयते। हनो घ्नीर्वधे, जेघ्नीयते । वञ्चस्रंसध्वंसभ्रंशकसपतपदस्कन्दोऽन्तो नीः, चनीस्कद्यते। ये नवा जनसनखनामाः, जाजन्यते जञ्जन्यते। ऋतो रीश्चियङ्यक्क्येषु, चेक्रीयते। ऋमतां रीः पूर्वस्य, नरीनृत्यते सोपुप्यते । क्ङिति यि शय् शीङः, शाशय्यते। व्येस्मोर्यङि य्वृत् वेवीयते ॥ इति यङन्ताः ॥

बहुलं लुप् यङः, बोभूयते, बहुलं लुपि नात्मने, बोभोति बोभवीति बोभुवति अबोभुवीत् अबोभोत् अबोभुवुः बोभवांचकार बोभाविता । अपास्पर्द् अपास्पाः नानात्ति दादाद्धि अदादधुः अदादधीत् अचोस्कुन् अचोस्कुन्दुः अचोकुर्दीत् अचोकूः जङ्गन्ति जङ्गमीति । यमिरमिनमिगमिहनिम-




P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

निवनातितनादेर्धुटि क्ङिति लुक्, जङ्गतः जङ्गमति जङ्गन्मि जङ्गहि अजङ्गमीत् जङ्घन्ति वध्यात् चंचूर्त्ति चङ्घातः अचंखानीत् असास्वपीत् सासुप्यात् । रिरौ च लुपि ऋमतश्चाद्रीः, वर्त्तीति वरिवृतीति वरीवृतीति वर्वर्त्ति अवर्वर्त् अववर्वाः अववृतीत् चरीकर्त्ति चर्कर्त्ति चरिकर्त्ति अरियृतः आरति अरियृति आरारीत् अरियारीत् जर्गृहीति जाग्रहीति पाप्राष्टि पाप्रच्छव्ः पाप्रश्मः। मव्यविश्रिविज्वरित्वरेरुपान्त्येन सहोट् अनुनासिके क्वौ धुटि क्ङिति च, मोमवीति । राल्लुक् च्छ्वोः, तोतोर्ति तोतूर्वति मोमोर्त्ति । अहन्पञ्चमस्य क्ङिति धुटि दीर्घः, शंशान्तः

॥ इति यङ्लुबन्ताः ॥

द्वितीयायाः काम्य इच्छायां वा, इदंकाम्यति स्वःकाम्यति । अमव्ययात्क्यन् च। क्यन्यवर्णस्येः, पुत्रमिच्छतीति पुत्रीयति गव्यति । नं क्ये नाम पदं, राजीयति राजीयांचकार दीव्यति कर्त्रीयति। आपत्यस्य क्यच्व्योर्व्यञ्जनाद्यो लुक्, गार्गीयति कवीयति। क्यो वा व्यञ्जनाल्लुक्, समिधिता समिध्यता।क्षुत्तृड्गार्ध्येऽशनायोदन्यधनायम्, अशनायति। वृषाश्वान्मैथुने स्सोऽन्तः, वृपस्यति। अश्व लौल्ये, चात्स्सोऽन्तः, दधिस्यति दध्यस्यति । आधाराच्चोपमानादाचारे, चाद् द्वितीयायाः, पुत्रमिव प्रासाद इव चाचरति पुत्रीयति प्रासादीयति च, शिष्यं कुटीं चेत्यर्थः। अमव्ययेत्येवेति इदं काम्यति। कर्त्तुः क्विप् गल्भक्लीबहोडात्तु ङित् उपमानादाचारे, राजेवाचरतीति राजानति होडते। क्यङ् कर्त्तुरुपमानात्, हंसायते। सो वा लुक्, पयायते पयस्यते । ओजोऽप्सरसः सो लुक्, अप्सरायते कुमारायते पाचिकायते कवयति अमालासीत् । च्व्यर्थे भृशादेः स्तोर्लुक् कर्त्तुः क्यङ्, भृशायते, उत्सुकचपलपण्डितद्रमद्राः, दुर्मनायते वेहायते उदमनायत औढीयत् । डाच् लोहितादिभ्यः षित्क्यङ् च्व्यर्थे, लोहितायते, अलोहितं लोहितं भवतीत्यर्थः, चर्महर्षगर्वनिद्राकरुणाः । क्यङ्षो

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नवाऽऽत्मने, सुखायति सुखायते । कष्टकक्षकृच्छ्रसत्रगहनाय पापे क्रमणे क्यङ्, कृच्छ्रायते । सुखादेरनुभवे, सुखायते, अलीक कृपण । शब्दादेः कृतौ वा, शब्दं करोतीति शब्दायते, वैरकलहवेगयुद्धमेघाः । तपसः क्यन्, तपस्यति । नमोवरिवश्चित्रङोऽर्चासेवाश्चर्ये । चीवरात्परिधानार्जने णिङ्, परिचीवरयते । णिज्बहुलं नाम्नः कृगादिषु । त्र्यन्त्यस्वरादेर्लुक् णीष्ठेयसौ, तिलकयति त्रिलोकीम् । पटयति दवयति त्वापयति समीचयति प्रशस्ययति । व्रताद् भुजितन्निवृत्त्योः, व्रतयति सत्यापयति । श्वेताश्वाश्वतरगालोडिताह्वरकस्याश्वतरेतकलुक्, श्वेतयति अश्वयति गालोडयति आह्वरयति ॥ इति नामधातवः ॥

धातोः कण्ड्वादेर्यक्, कण्डूयति कण्डूयते कण्डूयांचकार । महीङ् पूजायां । मन्तु अपराधे, मन्तूयति । वल्गु माधुर्ये । तिरस् अन्तर्द्धौ । भिष्णुक उपसेवायां । कण्डवादेस्तृतीयोऽशो द्विः, कण्डूयियिषति ॥ इति कण्ड्वादयः ॥ क्रियाव्यतिहारेऽगतिहिंसाशब्दार्थहसो ह्वहश्चान्योऽन्यार्थे कर्त्तर्यात्मने, व्यतिपुनते व्यतिहरन्ते भारं व्यतिस्ते व्यतिहे व्यतिषीत ॥

निविशः कर्त्तर्यात्मने, न्यविशत । उपसर्गादस्योहो वा, उदस्यति उदस्यते । उपसर्गादूहो ह्रस्वः, पर्युहति पर्युहते । उत्स्वराद्युजेरयज्ञतत्पात्रे, उद्युङ्क्ते नियुंक्ते । परिव्यवात्क्रियः, विक्रीणिते । परावेर्जेः, पराजयते विजयते । उदश्चरः साप्यात्, गुरुवचनमुच्चरते । क्रीडोऽकूजने, संक्रीडते । भुनजोऽत्राणे, भुंक्ते ओदनं । हृगो गततांच्छील्ये, पैतृकमनुहरन्तेऽश्वाः । पूजाचार्यकभृत्युत्क्षेपज्ञानविगणनव्यये नियः, नयते स्याद्वादे, उपनयते माणवकं कर्मकरान् शिशुं तत्त्वार्थे वा, विनयते ऋणं शतं वा । कर्तृस्थामूर्त्ताप्यात् । वृत्तिसर्गतायने । परोपात् वृत्त्यादौ । वेः स्वार्थे । प्रोपादारम्भे क्रमः, उपक्रमते, अंगीकरणेऽपि । नुप्रच्छ आङः, आनुते । गमेः



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

क्षान्तौ, आगमयस्व। यमः स्वीकारे। वा स्वीकृतौ यमः सिजनिट् कित्, उपायत उपायंस्त महास्त्राणि। देवार्चामैत्रीसंगमपथिकर्त्तृकमन्त्रकरणे स्थ उपात्, उपतिष्ठते जिनेन्द्रं ऐंकारेण च वार्णीं। संविप्रावात्, प्रतिष्ठते। ज्ञीप्सास्थेये, संशय्याभये तिष्ठते श्रेणिकः। समो गिरः प्रतिज्ञायां, संगिरते स्याद्वादं। अवात्। निह्नवे ज्ञः, शतमपजानीते। श्रुवोऽनाङ्प्रतेः, शुश्रूषते। गमो वात्मनेऽनिट्सिजाशिषौ कित्, समगत समगंस्त। हनः सिच्च अनिट् कित्, आहत। अणिक्कर्मणिक्कर्तृकाण्णिगोऽस्मृतौ, आरोहयते हस्ती हस्तिपकान्। वदोऽपात् अपवदते॥ इत्यात्मनेपदप्रक्रिया॥ परानोः कृगः परस्मै, अनुकरोति। प्रत्यभ्यतेः क्षिपः। प्राद्वहः। परेर्मृषश्च। वोपाद्रमः। चल्याहारार्थेङ्बुधयुधप्रुद्रुस्रुनशजनो णिगः, अध्यापयति॥ इति परस्मैपदप्रक्रिया॥

क्यः शिति भावकर्मणोः। तत्साप्यानाप्यात्कर्मभावे कृत्यक्तखलर्थाश्च आत्मने, क्रियते कटः, अभिहितत्वान्नाम्नः प्रथमा, भावे प्रथमत्रिकमेकवचनं च, बभूवे। स्वरग्रहदृशहन्भ्यः स्यसिजाशीःश्वस्तन्यां ञिट् वा, भाविता भविता। भावकर्मणोरद्यतन्यां ञिच्च तलुक् च, अभावि, बुभूष्यते बोभूय्यते स्तूयते स्मर्यते संस्क्रियते। तनः क्ये वाऽऽत्, तायते तन्यते, इज्यते जायते धीयते। आत ऐः कृञ्चौ ञ्णिति, अधायि अधायिषाताम्, अधायिषत दायिषीष्ट अघानि अवधि वधिषीष्ट गृह्यते शम्यते। मोऽकमियमिरमिनमिगमिवमाचमो ञ्णिति कृति ञौ च न वृद्धिः, अशमि अकामि। भञ्जेर्वा नलुक् ञौ, अभाजि अभञ्जि। ञिख्णमोर्वा लभः स्वरान्नोऽन्तः, अलाभि अलम्भि॥ इति भावकर्मप्रक्रिया॥ दुहिभिक्षिरुधिप्रच्छिचिग्ब्रूग्शास्वर्थयाचिजेः गौणे कर्मणि नीवह्हृकृषेर्मुख्ये विभक्तयः। सौकर्यादविवक्षिते कर्तृव्यापारेऽकर्मकः। एकधातौ कर्मक्रिययैकाकर्मक्रिये (कर्मकर्त्तरिरूपे) ञिक्यात्मनेपदानि,





P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

क्रियते कटः स्वयम्। न कर्मणा ञिच् योगे, अदुग्ध गौः पयः स्वयम्। स्वरदुहो वा ञिच्, अकृताकारि वा कटः, अदुग्धादोहि वा स्वयं गौः। णिस्नुश्र्यात्मनेपदाकर्मकात् ञिच् न, पचन्तं प्रायुंक्तेत्यपीपचत् प्रास्नाविष्ट, करणक्रियया क्वचित् ञ्यादीनि, परिवारयन्ते कण्टकाः स्वयं वृक्षं ॥ इति कर्मकर्त्तरिप्राक्रिया ॥

अयदिस्मृत्यर्थे भविष्यन्ती भूतानद्यतने, स्मरासि साधो! स्वर्गे स्थास्यामः। हशश्वद्युगान्तःपृच्छये ह्यस्तनी परोक्षा च, अगच्छत् जगाम वा किंवाऽद्यतनी पुरादौ,अवात्सुरवसन् ऊषुर्वा पुरा छात्राः। स्मे च वर्तमाना चात्पुरादावुपपदे, पुरा वसन्ति पृच्छति स्म। पुरायावतोर्वर्तमाना वत्स्यति, पुरा भुंक्ते। कदाकर्ह्योर्नवा. कदा भुंक्ते भोक्ष्यते वा। पञ्चम्यर्थहेतौ वा, आगच्छति सूरिरनुयोगमादत्स्व। सत्सामीप्ये सद्वद्वा भूते भविष्यति च, अयमागच्छामि। संभावने साध्यासिद्धावपि, समये चेत्प्रयत्नोऽभूदुदभूवन् विभूतयः। भूते क्रियातिपत्तौ सप्तम्यर्थे क्रियात्तिपत्तिः, दृष्टोऽभविष्यदभोक्ष्यत। क्षेपेऽपि-जात्वोर्वर्तमाना, अपि जन्तून् हिनास्ति धिग् गर्हामहे। कथमि सप्तमी च वा क्षेपे, कथं मांसं भक्षयेत् भक्षयति वा धिगन्याय्यमेतत्। अश्रद्धामर्षेऽन्यत्रापि, न संभावयामि तत्रभवानदत्तं गृह्णीयाद्ग्रहीष्यति वा। जातुयद्यदायदौ सप्तम्यश्रद्धामर्षे। क्षेपे च यच्च यत्र। सप्तम्युताप्योर्बाढे। सतीच्छार्थाद्, अपि संयतः सन्नकल्प्यमिच्छेत्। इच्छार्थे सप्तमीपञ्चम्यौ, तपस्यतु तपस्येद्वा भवानितीच्छामि। स्मे पञ्चमी प्रैषानुज्ञावसरे और्ध्वमौहूर्त्तिके, उपरि मुहूर्त्तस्य करोतु स्म कटं। अधीष्टौ स्मे, रक्ष स्मानुव्रतानि। शक्तार्हे कृत्याश्च चात्सप्तमी, वहेच्छेदसूत्रं भवान् वाह्यं भवता वा। माङ्यद्यतनी, मा च भूत्कोऽपि दुःखितः। सस्मे ह्यस्तनी च, करोन्मा स्म वधं, मा कार्षीरंहांसि। धातोः सम्बन्धे प्रत्ययाः, गोमानासीत्। भृशाभीक्ष्ण्ये हिस्वौ यथाविधि तध्वमौ च त-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

द्युष्मादि, अधीष्वाधीष्वेत्येवायमधीते । प्रचये नवा, अधीध्वेत्यधीध्वे ॥ इति विभक्तिव्यवस्था । इत्याख्यातप्रकरणम् ॥

## ॥ अथ कृदन्तप्रकरणं ॥

आतुमोऽत्यादिः कृत् । कर्तरि कृत्, विशेषमन्तरा । बहुलं उक्तेऽन्यत्रापि कृत्, मोहनीयं दानीयः । व्याप्ये घुरकेलिमकृष्टपच्यं कर्तरि, भिदुरा भिदेलिमाः कृष्टपच्या वा शालयः । श्लिष्शीङ्स्थासवसजनरुहजॄभजेः क्तः कर्तरि वा, श्लिष्टः शयितः स्थितः रूढः । ऋल्वादेरेषां तो नोऽप्रः । स्वरात्कृतो नो णः, जीर्णः । आरम्भे यः क्तः सोऽप्यत्र, प्रकृतः कटं । गत्यर्थाकर्मकपिबभुजेः, यातास्ते, पठितो भवान्, पयः पीता, अन्नं भुक्ताः । अद्यर्थाच्चाधारे चाद्गत्यर्थादेः, इदं तेषां यातं, इदं तेषां जग्धं । क्त्वातुमम्भावे सोऽप्यत्र । भीमादयोऽपादाने । संप्रदानाच्चान्यत्रोणादयः, चादपादानात् । ऋवर्णव्यञ्जनाद् घ्यण्, कार्यं । क्तेऽनिटश्चजोः कगौ घिति, पाक्यं । उवर्णादावश्यके, लाव्यं । घ्यण्यावश्यके न कगौ । निप्राद्युजः शक्ये, नियोज्यः । णिन् चावश्यकाधमर्ण्ये चात्कृत्याः, अवश्यंकारी शतंदायी गेयः । आसुयुवपिरपिलपित्रपिडिपिदभिचम्यानमो घ्यण्, याव्यं आनाम्यं । त्यजयजप्रवचो न कगौ घ्यणि, त्याज्यं याज्यं प्रवाच्यं । न्यङ्कूद्गमेघादयो निपातात् । तव्यानीयौ, शयितव्यं शयनीयं । य एच्चातः, अनतः स्वराद्यःआतश्चैत्, देयं जेयं । शकितकिचतियतिशसिसहियजिभजिपवर्गाद्यः, शक्यं शस्यं तप्यं गम्यं, याज्यं भाज्यं चापि । यममदगदोऽनुपसर्गात्, गद्यं । क्षय्यजय्यौ शक्तौ । क्रय्यः क्रयार्थे । वर्योपसर्यावद्यपण्यमुपेयर्तुमतीगर्ह्यविक्रेये । इवृग्स्तुजुषेतिशासः क्यप् । ह्रस्वस्य तः पित्कृति, आदृत्यः अधीत्यः शिष्यः । ऋदुपान्त्यादकॢपिचृदृचः, वृत्यं । कृवृषिमृजिशंसि-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गुहिदुहिजपो वा, शस्यं गुह्यं जप्यं। घ्यणाद्याश्च कृत्याः। णकतृचौ कर्तरि, पाचकः पक्ता। अच् धातोः, पठः। त्रने वाजेर्वी, वेता अजिता। अर्हे तृच्, वोढा पदस्य, कारकः जनकः घातकः दायकः। लिहादिभ्योऽच्, लेहः शेषा सेवा मेधा भरा कन्या। ब्रुवः। नन्द्यादिभ्योऽनः, नन्दनः मदनः दूषणः साधनः शोभनः रमणः कर्त्तनः तपनः दहनः यवनः पवनः दमनः सूदनः नाशनः भीषणः। ग्रहादिभ्यो णिन्, ग्राही स्थायी उत्साही निश्रावी शायी रक्षी वादी वासी। नाम्युपान्त्यप्रीकृगृज्ञः कः, बुधः प्रियः गिरः ज्ञः, ज्ञाता। उपसर्गादातो डोऽश्यः, प्रज्यः सुरः। व्याघ्राघ्रे प्राणिनसोः। घ्राध्मापाट्धेदृशः शः, जिघ्र पिबः पश्यः उद्धयी। वा ज्वलादिदुनीभूग्रहास्रोर्णः, दवः दावः आस्रवः। तन्व्यधीण्श्वसातः, तानः व्याधः आयः श्वासः म्लायः। नृत्खन्रञ्जः शिल्पिन्यकट्, नर्त्तकः खनकः। अकट्घिनोश्च रञ्जेर्नलुक्, रजकः। गस्थकः, गाथकः। टनण्, गायनः। हः कालव्रीह्योः, हायनः। तिक्कृतौ नाम्नि आशिषि, शान्तिः वर्धमानः। न तिकि दीर्घश्च, चात् लुक् गमां, यन्तिः। तौ नास्ताकि लुगात्त्वे, सतिः सातिः सन्तिः। कर्मणोऽण्, व्याप्याद्धातोरण्, सूत्रधारः। शीलिकामिभक्ष्याचरीक्षिक्षमो णः, बहुक्षमा। सुराशीधौ पिबष्टक्, सुरापी। आतो डोऽह्वावामः कर्मणः, पार्ष्णित्रं। समः ख्यः, गोसंख्यः। दश्चाङः, प्रियाख्यः। प्राज्ज्ञश्च, चाद् दश्च डः, पथिप्रज्ञः प्रपाप्रदः स्तनप्रधायः। संपूर्वाद् घाटिहनेरण्, संघाटः संघातः। कुमारशीर्षाण्णिन्, कुमारघाती। अचित्ते टक्, वातघ्नं। जायापतेश्चिह्नवति, जायाघ्नः पतिघ्नी। ब्रह्मादिभ्यः, ब्रह्मघ्नः कृतघ्नः गोघ्नोऽतिथिः। पाणिघताडघौ शिल्पिनि। कुक्ष्यात्मोदराद् भृगः खिः, खित्यनव्ययस्यारुपो मश्चान्तः, कुक्षिम्भरिः आत्मम्भरिः। अर्होऽच्, पूजार्हा। धनुर्दण्डत्सरुलाङ्गलाङ्कुशार्ष्टिशक्तितोमरघटाद्ग्रहः, घटीग्रहः।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

आयुधादिभ्यो धृगोऽदण्डादेः, चक्रधरः । रजःफलेमलाद्ग्रहः, फलग्रेहिः । किंयत्तद्बहोरः कृगः, बहुकरः । संख्याहर्दिवाविभानिशाप्रभाभाश्चित्रकर्त्राद्यन्तानन्तकारबहुरुर्धनुर्नान्दीलिपिलिविबालिभक्तिक्षेत्रजङ्घाक्षपाक्षणदारजनिदोषादिनदिवसाट्टः कृगः, संख्याकरः त्रिकरः । हेतुतच्छीलानुकूलेऽशब्दादेः, तीर्थकरः, शब्दकारः वैरकारः, कर्मकरः । क्षेमप्रियमद्रभद्रात्खाण्, क्षेमङ्करः क्षेमकारः, योगक्षेमकरी । मेघर्तिभयाभयात्खः, मेघङ्करः अभयङ्करः । प्रियवशाद्वदः, प्रियंवदः । कूलाभ्रकरीषात्कषः, अभ्रंकषः । सर्वात्सहश्च चात्कषः, सर्वंसहा । मन्याण्णिन्, पण्डितं मन्यते बन्धुमिति पण्डितमानी । कर्तुः खश्, कर्मणः कर्तुः खश्, आत्मानं पण्डितं मन्यते पण्डितंमन्यः पण्डितमानी च । बहुविध्वरुस्तिलात्तुदः, अरुन्तुदः । नग्नपलितप्रियान्धस्थूलसुभगाढ्यतदन्तात् च्व्यर्थेऽच्वेर्भुवः खिष्णुखुकञ्, आढ्यंभविष्णुः आढ्यंभावुकः । कृगः खनट् करणे च्व्यर्थेऽच्वेः, अन्धंकरणं । नाम्नो गमः खड्डौ च, चात्खः, तुरङ्गः तुरगः तुरङ्गमः । पार्श्वादिभ्यः शीङोऽत्, पार्श्वशयः । चरेष्टः, कुरुचरी । पुरोऽग्रतोऽग्रेसर्त्तेः, अग्रेसरः । स्थापास्नात्रः कः, शमस्थः । दुहेर्दुघः, कामदुघा । भजो विण्, अर्धं भजतीति अर्धभाक् । मन्वन्क्वनिप्विच् क्वचित्, शर्म । वन्याङ् पञ्चमस्य, विजावा पीवरी कृत्वा शुभंयाः । क्विप् धातोः, पाः वाः कीः । क्वौ इस् आसः शासः, मित्रशीः । आङः, आशीः । गमां क्वौ लुक्, जनगत् । छदेरिस्मन्त्रट् क्वौ, धामच्छद् । ऋत्विक् दधृक् उष्णिक् । कर्त्तुर्णिन् उपमानात्, सिंह इव नर्दतीति सिंहनर्दी । अजातेः शीले, शीतभोजी । साधौ, चारु नृत्यति चारुनर्ती । ब्रह्मभ्रूणवृत्राद् भूते हनः क्विप्, वृत्रहा । कृगः सुपुण्यपापकर्ममन्त्रपदात्क्विप् भूते, सुकृत् । दृशः क्वनिप् भूते कर्मणः, मेरुं अद्राक्षीदिति मेरुदृश्वा । सहराजभ्यां कृग्युधेः । सप्तम्या ज-





P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नेर्ड्ः, अप्सुजं अब्जं । क्तक्तवतू धातोर्भूते, अकारीति कृतः, अकार्षीदिति कृतवान् । ऋवर्णश्व्यूर्णुगः क्तितो नेट्, तृतः तीर्णः ऊर्णुतः श्रितः । उवर्णात्, नुतः भूतः । वेटोऽपतः क्तयोर्नेट् । ऊदितः क्त्वो वेट्, यतः । रदादमूर्च्छमदः क्तयोर्दस्य च नः, पूर्णः । व्यञ्जनान्तःस्थातः, व्यञ्जनादन्तस्थायाः क्तयोर्नः, द्राणः । सूयत्याद्योदितः, सूनः लग्नः । डीयश्व्यैदितः क्तयोर्नेट्, डीनः शूनः चरीकृतः । क्षैशुषिपचो मकवं, क्षामः शुष्कं पक्वं । आदितः क्तयोर्नेट्, ञिक्ष्विदा ञिस्विदा गात्रप्रक्षरणे, स्विन्नः । नवा भावारम्भे आदितः क्तयोरिट् । ऋह्रीघ्राध्रात्रोन्दनुदविन्तेर्वा नः, ऋणं ऋतं । वित्तं धने प्रतीते । भित्तं शकलं । आः खानिसनिजनः क्ङिति धुटि, जातः खातः । क्षुधवधस्तेषां क्तक्तवतुक्त्वामिट्, उषितः । न डीङ्शीङ्पूङ्धृषिक्ष्विदिस्विदिमिदः सेटौ क्तौ कित्, शयितः । णौ दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्तम् वा । दोसोमास्थ इः किति ति, मितः । छाशोर्वा, शितः निशातः । धागो हिः । समस्ततद्धिते वा मो लुक्, संहितं सहितं । प्राद्दागस्त आरंभे क्ते वा, प्रत्तं प्रदत्तं । निविस्वन्ववात् । दस्ति नामिनो दीर्घः, नीत्तं । यपि चादो जग्ध् चात् किति, जग्धं । निनद्याः स्नातेः कौशले षः, निष्णातः नदीष्णातः । इति निष्ठाः । तत्र क्वसुकानौ परोक्षायां तद्वच्च तौ, शुश्रुवान् सस्वजानः । घसेकस्वरातः क्वसोरादिरिट्, जक्षिवान्, ददिवान् । गमहनविद्लृविशदृशो वेट्, जग्मिवान् जगन्वान् । शत्रानशौ सति सस्यौ त्वेष्यति, पचन् पक्ष्यन् । अतो म आने, पचमानः पक्ष्यमाणः । वा वेत्तेः क्वसुः सति, विद्वान् विदन् । वयःशक्तिशीले सति शानः, कतीहात्मानं वर्णयमानाः । सुगृद्विषार्हः सत्रिशत्रुस्तुत्येऽतृश्, अर्हन् । तृन् शीलधर्मसाधुषु, करणं शीलं धर्मस्तत्र साधु वा कर्त्ता । भ्राज्यलङ्कृग्निराकृग्सहिरुचिवृतिवृधिचरिप्रजनापत्रप इष्णुः, सहि-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ष्णुः परिषहान् । उदः पचिपतिपदिमदेः, उन्मदिष्णुः। स्थाग्लाम्लापाचिपरिमृजिक्षेः स्नुः, स्थास्नुर्यशो वीरस्य। मृजौष् शुद्धौ, मृजोऽस्य वृद्धिः, परिमार्क्ष्णुः। त्रसिगृधिधृषिक्षिपः क्नुः, ञिधृषा प्रागल्भ्ये, धृष्णुः, त्रसै भये, त्रस्नुः। सन्भिक्षाशंसेरुः, चिकीर्षुः भिक्षुः आशंसुः। दाट्धेसिशदसदो रुः, षिञ् बन्धने, सेरुः। शीङ्श्रद्धानिद्रातन्द्रादयिपतिगृहिस्पृहेरालुः, स्पृहयालुः। सस्रिचक्रिदधिजज्ञिनेमिः। शॄकमगमहनवृषभूस्थ उकण्, उपस्थायुको गुरुं। लषपतपदः, उपपादुकः, । भूषाक्रोधार्थजुसृगृधिज्वलशुचश्चानः, मण्डनः कोपनः। इङ्गितो व्यंजनाद्यन्तात्, वर्धनः जुगुप्सनः। यजिजपिदंशिवदादूको यङन्तात्, वावदूकः। शमष्टकाद् घिनण्, क्षमी। युजभुजभजत्यजरंजद्विषदुषद्रुहदुहाभ्याहनः, योगी त्यागी द्रोही। मथलपः, प्रलापी। विपरिप्रात्सर्त्तेः, प्रसारी। संपरिव्यनुप्राद्वदः, प्रवादी। व्यपाभेर्लषः। संप्राद्वसः। समत्यपाभिव्यभेश्चरः, व्यभिचारी। निन्दहिंसक्लिशखादविनाशिव्याभाषासूयानेकस्वराद् णकः, हिंसकः खादकः चकासकः। वृद्भिक्षिलुण्टिजल्पिकुट्टाट्टाकः, भिक्षाकः। जीणृदृक्षिविश्रिपरिभूवमाभ्यमाव्यथ इन्, जयी दरी अभ्यमी। सृघस्यदो मरक्, प्रसृमरः। भियो रुरुकलुकं कित्, भीलुकः। सृजीणृनशष्ट्वरप्, जित्वरः। भंजिभासिमिदो घुरः, ञिमिदा स्नहने, मेदुरः। स्म्यजसहिंसदीपकम्पकमनमो रः, जसू मोक्षणे, अजस्रं नम्रं। तृषिधृषिस्वपो नजिङ्, तृष्णक्। स्थेशभासपिसकसो वरः, ईश्वरः। क्विप्, भाः धूः विद्युत् भित् वित् छित् भूः। इति शीले। शंसंस्वयंविप्राद् भुवो डुः सति, प्रभुः। ऋधूसूखनचरसहार्तेरित्रः, अरित्रं। नीदावशसूयुयुजस्तुतुदसिसिचमिहपतपानहस्त्रट्, नेत्रं मेढ्रं पात्रं नद्ध्रं। ज्ञानेच्छार्चार्थजीच्छील्यादिभ्यः सत्यर्थे क्तः,



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

ज्ञातः इष्टः अर्चितः सुप्तः । पदरुजविशस्पृशो घञ् कर्तरि, पादः । भावाकर्त्रोर्घञ्, पचनं पच्यते यत् येन यस्मै यस्माद्यस्मिन्वेति पाकः । उद्यमोपरमौ । स्यदो जवे । घञि भावकरणे रञ्जेर्नलुक्, रागः । भूश्र्यदोऽल्, प्रभवः । संनिव्युपाद्यमो वा, संयमः संयामः । युवर्णवृदृवशरणगमृद्ग्रहः, तरः जयः स्तवः । समुदोऽजः पशौ, समजः । संमदप्रमदौ हर्षे । निघोद्घसंघोद्घनापघनोपघ्नं निमित्तप्रशस्तगणात्याधानाङ्गासन्नम् । मूर्तिनिचिताभ्रे घनः । परेर्घो हनः । परेर्घाङ्कयोगे रो लो वा । निपाने युधि चाहवः । हनो वा वधू च, वधः घातः। वर्षविघ्नेऽवाद्ग्रहो वा, अवग्रहः। प्राद्रश्मितुलासूत्रे वा, प्रग्राहः । युपुद्रोर्घञ्, संयावः । नियश्चानुपसर्गाद्वा, नयः नायः । भुवोऽवज्ञाने वा परेः, परिभावः परिभवः। इणोऽभ्रेशे नेः, न्यायः। परेः क्रमे, पर्यायः। चितिदेहावासोपसमाधाने कश्चादेश्चेः, कायः । स्थादिभ्यः कः, प्रस्थः संस्था व्यवस्था प्रपा विधः विघ्नं, आयुधं आढ्यः । ट्वितोऽथुः, नन्दथुः क्षवथुः क्षवः । ड्वितस्त्रिमक् तत्कृते, पाकेन कृतं पक्त्रिमं कृत्रिमं । याजिस्वपिरक्षियतिप्रच्छो नः, प्रश्नः। उपसर्गाद्दः किः, प्रधिः निधिः । व्याप्यादाधारे, उदकं धीयतेऽस्मिन्नित्युदधिः । स्त्रियां क्तिर्भावाकर्त्रोः, भूतिः । श्रुवादिभ्यः, श्रुतिः स्तुतिः पत्तिः वित्तिः लब्धिः शस्तिः पक्तिः । आस्यटिव्रज्यजः क्यप्, आस्या व्रज्या । समजनिपन्निषद्शीङ्सुगृविदिचरिमनीणः क्यप्, निषद्या शय्या सुत्या चर्या इत्या । कृगः श च वा, क्रिया कृत्या कृतिः । मृगयेच्छायाञ्चातृष्णाकृपाभाश्रद्धान्तर्धाः । परेः सृचरेर्यः, परिसर्या । शंसिप्रत्ययादः, प्रशंसा गोपाया चिकीर्षा । क्तेटो गुरोर्व्यञ्जनात्, क्तेड्वद्गुरुमतो व्यञ्जनान्तादः, ईहा उक्षा शिक्षा । षितोऽङ्, क्षमा जरा । भिदादयः, भिदा छिदा विदा दया पृच्छा कारा धारा तारा गुहा वशा तुला क्षपा। उपसर्गाद्दातो-



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

ऽङ्, उपदा संधा प्रभा। णिवेत्त्यासश्रन्थघट्टवन्देरनः, कारणा वेदना वंदना। क्रुत्संपदादिभ्यः क्विप्, क्रुत् क्षुत् त्विट् रुक् शुक् मुद् भृत् गिर् स्रक् विपद् संसद् समित्। भ्यादिभ्यो वा क्विप् पक्षे क्तिः, भीः ह्रीः भिद् छिद् दृशू। जनोऽनिः शापे, अजननिः। ग्लाहाज्यः, हानिः। पर्यायार्हणोत्पत्तौ च णकः, भवतः शायिका, अर्हति भक्षिका, उदपादि भाक्षिका, चात्प्रश्नाख्याने। क्लीबे क्तः, हसितं। अनट् क्लीबे, गमनं। रम्यादिभ्यः कर्त्तर्यनट्, कमनः ग्रश्नः। भुजिपत्यादिभ्यः कर्मापादाने, असनं वसनं निर्झरणः। करणाधारे, लिखति अनयेति लेखनी, शेतेऽस्मिन्निति शयनं। पुंनाम्नि घः करणाधारे, प्रणयः प्रत्यक्षः शरः भवः प्रयरः। व्यञ्जनात् घञ्, वेदः रागः। प्राक्काले तुल्यकर्तृके धातोः क्त्वा, कृत्वा दत्त्वा जित्वा भुक्त्वा लब्ध्वा। अनञः त्त्वो यप् समासे, प्रकृत्य प्रणम्य प्रणिपत्य विधाय। ज्यश्च यपि न य्वृत्, चाद्वेः, प्रज्याय प्रवाय। क्रमः क्त्व वा दीर्घः, क्रान्त्वा क्रन्त्वा। ऊदितो वेट् त्त्वः, क्रमित्वा। जनशो न्युपान्त्ये तादिः क्त्वा कित् वा, रंक्त्वा रक्त्वा विरज्य नंष्ट्वा नष्ट्वा। ऋत्तृषमृषकृशवश्चथफः सेट् त्त्वा वा कित्, न्युपान्त्यथफः, श्रथित्वा श्रन्थित्वा तृषित्वा तर्षित्वा। त्त्वा सेट् न कित्, देवित्वा। क्षुधक्लिशकुषगुधमृडमृदवदवसः कित्, क्षुधित्वा। लघोर्यपि न णेर्लुक्, प्रशमय्य प्रतिपाद्य। हाको हिः, हित्वा विहाय। यपि हनिमनिवनतितनादेर्लुक्, निहत्य अवमत्य वितत्य। यमिरमिनमिगमीनां वा लुक्, विरम्य विरत्य। अन्यथैवंकथमित्थमः कृगोऽनर्थकात्त्वणम्, कथंकारं करोति। शापे व्याप्यात्, चौरंकारमाक्रोशति। यावतो विन्दजीवः कात्स्न्र्ये णम्, यावद्वेत्ति तावद् भुङ्क्ते यावद्वेदं भुंक्ते। चर्मोदरात्पूरेः वृष्टिमान ऊलुक् च, गोष्पदप्रं। शुष्कचूर्णरुक्षात्पिषस्तस्यैव, चूर्णपेषं पिनष्टि। कृग्ग्रहोऽकृतजीवात्, जीवग्राहं गृह्णाति। निमूलात् कषः।





P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

आ श्री... मन्दिर
... केन्द्र
...ोबा, गांधीनगर, पि ३८२००९





हनश्च समूलात्, समूलकाषं कषति । करणेभ्यः, अस्युपघातं हन्ति । स्वस्नेहनार्थात्पुषापिषः । हस्तार्थाद्ग्रहवर्त्तिवृत्तः । कर्त्तुर्जीवपुरुषान्नश्वहः । ऊर्ध्वात्पूःशुषः । व्याप्याच्चेवात्, चात्कर्त्तुः, ओदनपाचं पक्वः जमालिनाशं नष्टः । ऊर्याद्यनुकरणच्विडाचश्च गतिः, ऊरीकृत्य पटत्कृत्य कुण्ठीकृत्य लोहिताकृत्य । कारिका स्थित्यादौ । भूषादरक्षेपेऽलंसदसत् । पुरोऽस्तमव्ययं । तिरोऽन्तर्धौ कृगो नवा, तिरस्कृत्य तिरःकृत्वा । साक्षादादिश्च्व्यर्थे, साक्षात्कृत्य नमस्कृत्य । लोकाच्छेषस्य सिद्धिः, ॥

जीयाद्विश्वेश्वरो वीरो, भव्येभ्यः शाब्दशास्त्रदः ।
महानन्दाय तत्त्वार्थबोधाय समवस्तुनाम् ॥ १ ॥

इति मध्यमसिद्धप्रभाव्याकरणं
समाप्तं



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ श्री जैनामृत समिति ग्रंथमाला ग्रंथाङ्कः २ ॥

श्री जितसागरजी
तथा
श्री मुक्तसागरजी
पुस्तक संग्रह

# मध्यमसिद्धप्रभा व्याकरणं

( श्रीसिद्धप्रभावताराय श्रीसिद्धहैमानुसारि )

प्रकाशिका—कर्पटवाणिज्यपुरसत्कश्रेष्ठिमीठाभाई कल्याणजी इत्यभिधया श्वेतांबरसंस्थया विहितद्रव्यसाहाय्येन, जैनामृतसमितिः उदयपुर.

मुद्रणकर्त्ता—इन्दौर नगरे श्रीजैनबन्धुमुद्रणालयाधिपः श्रेष्ठी जुहारमल मिश्रीलाल पालरेचा.

प्रतयः २५० वीर संवत् २४५५ विक्रम १९८६ क्राइस्ट१९२९ पण्यं०—१२—०

P-10807
103149
श्रीमहावीर जैन आराधना केन्द्र
कोबा (गांधीनगर) पि. ३८२००९
P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

78464

**दे० ला० फंड के ग्रंथ मूल्य**

| | |
|---|---|
| श्राद्धप्रतिक्रमणसूत्रवृत्तिः | २-०-० |
| आवश्यकटीप्पनं | १-१२-० |
| श्रीपालचरित्रं संस्कृ० | ०-१४-० |
| सूक्तमुक्तावली | २-०-० |
| तंदुलवेयालीयपयन्नो सटीक | १-८-० |
| विंशतिस्थानकचरित्रं | १-०-० |
| सुबोधा समाचारी | ०-८-० |
| श्रीपालचरित्रं प्राकृते | १-४-० |
| प्रवचनसारोद्धारः पूर्वार्धं | ३-०-० |
| ,, ,, उत्तरार्धम् | ४-०-० |
| लोकप्रकाशः भाग पहिला | २-०-० |
| पंचवस्तुकग्रंथः सटीकः | ३-०-० |
| आचारप्रदीपः | १-८-० |
| नवपदप्रकरणबृहद्वृत्तिः | ४-०-० |
| सेनप्रश्नः(प्रश्नोत्तररत्नाकरः) | १-०-० |
| कल्पसूत्रसुबोधिका | २-०-० |
| विचाररत्नाकरः | ३-०-० |
| (क्षेत्र)लोकप्रकाशःभागदूसरा | २-८-० |

**समिति के ग्रंथ मूल्य**

| | |
|---|---|
| विशेषा०गाथा व विषयानुक्रम | ०-५-० |
| विचारसारप्रकरणं | ०-८-० |
| प्रव्रज्याविधानकुलकादि | ०-६-० |
| अनुयोगद्वारसूत्रं सटीकं | २-८-० |
| नंदीसूत्रं सटीकं | २-४-० |
| दशपयन्ना छायायुक्त | २-० ० |
| आवश्यकं मलयगिरिवृत्तियुतं पूर्वार्धम् | ४-० ० |
| नन्द्यादिसातना अकारादि व विषयानुक्रम. | २-०-० |

**हमारे तर्फ से.**

| | |
|---|---|
| पंचाशकादि अष्टशास्त्रीमूल | ४-०-० |
| अनुयोगद्वार चूर्णि व हारि० वृत्ति | २-०-० |
| अमुद्रित विशेषावश्यक गाथा | |
| नंदीचूर्णि व हारि०वृत्ति. | १-८-० |
| ऐन्द्रस्तुत्यादि. | ०-८-० |
| ऋषिभाषितसूत्रं | ०-३-० |
| ज्योतिष्करंडकटीका | ३-८-० |
| प्रत्याख्यानस्वरूपं कातंत्रविभ्रमः दानछत्रीसी।विशेषणवती वीशवीशी | १-४-० |
| युक्तिप्रबोध (दिगंबरखंडनं) | १-१२-० |
| प्रकरणसमुच्चयः | १-४-० |
| उपदेशमालामूलं | ०-३-० |
| वन्दारुवृत्ति | १-४-० |
| पंचाशकादिदशशास्त्रकाअकारादि | |

पता-श्रीऋषभदेवजी केशरीमलजी
पेढी बजाजखाना, रतलाम.

—×—

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust